



# नवीन(आधुनिक)पद्धत्या वेदाध्ययनप्रस्तुतिः
# Innovative Vedic Learning (IVL)

**प्रस्तोता - वेदवारिधिः प. रामानुजाचार्यः**

स्थापकन्यासी, पराङ्कुशाचार्य वैदिक अध्ययन संस्था, बेंगलूरु

निदेशकचरः, भारतसर्वकारस्य प्रगतसंगणनविकासकेन्द्रम्, बेंगलूरु,

२२-१-२०२४तः अन्तर्जालमाध्यमेन

# पत्रम्

# 1. वेदपरिचयः

वेदवारिधिः प. रामानुजाचार्यः





# वेदशब्दव्युत्पत्तिः

- वेदशब्दः कथं निष्पन्नः? कथं प्रवृत्तः? एतत् ज्ञातुं संहिता-ब्राह्मणेभ्य एव शक्यम् । काठक, मैत्रायणीय, तैत्तिरीय संहितासु वेदशब्दस्य निष्पत्तिक्रमः विवृतः -
- तैत्तिरीये - वेदेन वै देवा असुराणाँवित्तँवेद्यमविन्दन्त तद्वेदस्य वेदत्वं (तै.सं. 1.7.4.6)
- देवताः असुराणां द्रव्यं (स्थितीः) वेदेभ्यः अजानन् । तस्मात् एष वेद इति ।
- तैत्तिरीयब्राह्मणे प्रयुक्तप्रमाणवचनेषु अन्वविन्दन्, (अजानन् अथवा अलभन्त), अविन्दन्, अविन्दन्त, विविदुः इत्यादिशब्दाः पाणिनीयमतेन विदॢ इति धातोः निष्पन्नाः । विदॢ लाभे इत्यर्थः ।
- भट्टभास्करोऽपि तैत्तिरीयसंहिताभाष्ये अमुमेव अभिप्रायं सूचितवान् । वेदः - विद्यते - लभ्यते अनेनेति करणे घञ्, उञ्छादित्वादन्तोदात्तः ।
- आथर्वणे पिप्पलादशाखायां नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्ति तस्मादाहुर्वेदा इति पिप्पलादश्रुतिः - विष्णुतत्त्वविनिर्णये आनन्दतीर्थाः ।
- सुश्रुतसंहितायाम् - आयुरस्मिन् विद्यते, अनेन वा आयुर्विन्दति इति आयुर्वेदः आयुरस्मिन्नायुर्वेदे विद्यते - अस्ति, विद्यते - ज्ञायतेऽनेन, विद्यते - विचार्यतेऽनेन वा, आयुरनेन विन्दति - प्राप्नोति इति वा आयुर्वेदः. सूत्रस्थानं-१-१४.

वेदवारिधिः प. रामानुजाचार्यः





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org ✉: pivstrust@gmail.com



# वेदः - किम्?, कुतः?, कथम्?

- वेदशब्दव्युत्पत्तिः - विद ज्ञाने अदादौ, (वेत्ति) विद सत्तायाम् दिवादौ, (विद्यते) विदॢ लाभे तुदादौ, (विन्दति, विन्दते) विद विचारणे रुधादौ (विन्ते) एभ्यः धातुभ्यः निष्पन्नः वेदशब्दः । वे॑दः आद्युदात्तः । (यदि वे॒दः अन्तोदात्तः दर्भमुष्टिः) ऋचः॒ सामा॑नि॒ यजूꣳषि । सा हि श्रीर॒मृता॑ स॒ताम् ।
- अ॒न॒न्ता वै वेदाः । (तै.का.1.11) परि॑मिता॒ वा ऋच॒ः परि॑मितानि॒ सामा॑नि॒ परि॑मितानि॒ यजू॒ꣳष्यथै॒तस्यै॒वान्तो॒ नास्ति॒ यद्ब्रह्म॑ (सं.7.3.1.4) वा॒चा वि॑रूप॒ नित्य॑या । (2.6.11), पूर्वे॒ पूर्वेभ्यो॒ वच॑ ए॒तदू॑चुः । (तै.का.3.9)
- नावे॑दविन्मनुते॒ तं बृ॒हन्त॑म् । स॒र्वा॒नु॒भुमा॒त्मानꣳ॑ संप॒राये । ए॒ष नि॒त्यो म॑हि॒मा ब्रा॒ह्मण॑स्य । न कर्म॑णा वर्धते॒ नो कनी॑यान् । तस्यै॒वात्मा प॑द॒वित्तं वि॑दित्वा । न कर्म॑णा लिप्यते॒ पाप॑केन । (तै.का. 3.9)
- जाय॑मानो॒ वै ब्रा॒ह्मण॒स्त्रिभि॑र्ऋ॒णवा॒ जा॑यते ब्रह्मचर्ये॒णर्षि॑भ्यो य॒ज्ञेन॑ दे॒वेभ्य॑ः प्र॒जया॑ पि॒तृभ्य॑ ए॒ष वा अ॑नृ॒णो यः पु॒त्री यज्वा ब्रह्मचारिवा॒सी । (तै.सं.6.3.10)
- सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

वेदवारिधिः प. रामानुजाचार्यः

# वेदः - किम्?, कुतः?, कथम्?

सत्सन्तानप्रसूत-सदाचारनिष्ठ-आत्मगुणोपेत-वेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्य गुरुमुखोच्चारणानूच्चारणपूर्वकम् अक्षरराशिग्रहणफलम् अध्ययनम् - (भगवद्रामानुजविरचिते श्रीभाष्ये जिज्ञासाधिकरणप्रारम्भे)

स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै᳚ । ओं शान्ति॒श्शान्ति॒श्शान्तिः॑ ॥ (तै.आ.5.13)

**विद्यासूक्ते** - विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहम् अस्मि ।
असूयकायानृजवेऽयताय न मां ब्रूया वीर्यवती तथा स्याम् ॥ १ ॥

य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्चनाह ॥ २ ॥

अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयाः तथैव तान्न भुनक्ति श्रुतं तत् ॥ ३ ॥

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥ ४ ॥

**मीमांसायाम्** - वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । वेदाध्ययनरूपत्वात् अधुनाऽध्ययनं यथा ॥
भगवान् एक एव गुरुमुखमनधीत्य वेदानशेषान् प्रवक्ति

वेदवारिधिः प. रामानुजाचार्यः





# वेदानां प्रयोजनम्

- धर्म, अर्थ, काम, मोक्षाख्य चतुर्विध-पुरुषार्थसाधनं वेदेभ्य एव सिद्ध्यति । दैव-आसुर-सम्पद्विभागेन स्वस्वाविद्या-कर्म-वासना-रुच्यनुसारं कश्चित् कश्चित् फलं वेदोक्तकर्मानुष्ठानेन लभते ।
- त्रैगुण्यविषया वेदाः निस्त्रैगुण्यो भवार्जुन । (भ.गी. 2.45)
- सात्विक, राजस, तामसभेदेन त्रिगुणात्मकफलं प्राकृतं बुभुक्षूणाम्, अमृतत्वाख्यमोक्षः मुमुक्षूणां त्रिगुणरहित-शुद्धसत्वमयः अप्राकृतः ।
- धर्मार्थकामाः त्रिवर्गत्वेनोच्यन्ते । मोक्षः अपवर्गः ।
- यावानर्थ उदपाने सर्वतः सम्प्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥ (भ.गी. 2.46)
- ऐहिकफलभूत-पशु-पुत्र-वृष्ट्यन्न-शत्रुजय-साम्राज्य-दीर्घायुस्तेजो-वर्चः-श्रीर्यशो-ब्रह्मवर्चसान्नाद्येन्द्रिय-प्रतिष्ठा-कीर्ति-सर्वलोकप्रियत्वादयः त्रिवर्गान्तःपातिनः - काम्यत्वेनानुष्ठितवेदोक्तकर्मजन्याः अस्थिराः अल्पाः दुःखमूलत्व-दुःखमिश्रत्व-दुःखोदर्कत्वादिदोषयुक्ताः । त एव वैदिकक्रियाः सङ्गवर्जिताः फलाभिसन्धिरहिताः सात्विकत्यागपुरस्सरम् अनुष्ठिताः न बन्धकाः, मोक्षायोपकुर्वन्ति ।
- आमुष्मिकस्वर्गादयोऽपि नाक्षयाः, अन्तवन्तः एव । कर्मात्यन्तक्षयरूपमोक्षस्तु अनन्तः स्थिरः, शाश्वत इति यावत् । अपुनरावृत्तिमान् (पुनर्जन्मरहितः)






# चैतन्यकृत्यसर्वस्वम्

| साध्यम् | साधनम् | इतिकर्तव्यता |
|---|---|---|
| अनुभवः | उपासना | परविद्या (द्वात्रिंशद् ब्रह्मविद्याः) |
| ज्ञानम् | अध्ययनम् | अपरा विद्या (चतुर्दशविद्यास्थानानि) |
| कौशलम् | अभ्यासः | कलाः (चतुःषष्टिः) |

वेदवारिधिः प. रामानुजाचार्यः

# अपराविद्याः

तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते (पाणिनीयशिक्षा 42)
(ज्ञानम् = साङ्गोपाङ्ग-वेद-ज्ञानम्)




वेदवारिधिः प. रामानुजाचार्यः

# चतुर्दशविद्यास्थानानि

**शीक्षा** – वर्णानाम् उच्चारण-विशेष-प्रतिपादन-तत्परा
**निरुक्तम्** – वर्णसामान्यादिभ्यः पदार्थ-विशेष-प्रतिपादन-तत्परम्
**छन्दो-विचितिः** – वर्ण-सङ्ख्या-विशेष-नियत-गायत्र्यादि-छन्दोमात्र-प्रतिपादिका
**व्याकरणम्** – वर्ण-समुदायात्मक-रूप-पदानां साधुत्वासाधुत्व-मात्रव्यापृतम्
**कल्पसूत्राणि** – पद-सङ्घात-रूप-वाक्य-विशेष-चोदित-कर्मानुष्ठान-विशेष-कल्पना-प्रवृत्तानि
**ज्योतिषम्** - यथाशास्त्रम् अनुष्ठेय-कर्मणां यथाकालानुष्ठानार्थं कालविशेषप्रदर्शनप्रधानम्
**न्यायशास्त्रम्** – प्रमाणादि-षोडश-पदार्थ-व्यवहारमात्र-प्रतिष्ठापकम्
**मीमांसा** – सोपबृंहणानां वेदानां वचन-व्यक्ति-विशेष-निर्धारणार्थ-युक्ति-विशेष-प्रतिष्ठापिका
उपबृंहणेषु – **धर्मशास्त्रम्** – कर्मभागोपबृंहणप्रधानम्
इतिहास-पुराणानि – ब्रह्मभागोपबृंहणप्रधानानि –
तेषु **इतिहासाः** धर्मादिपुरुषार्थद्वारा प्रवर्तन्ते ।
**पुराणानि** तु – परतत्त्व, परमहित, परमपुरुषार्थेषु साक्षात् उपबृंहणानि । तत्र सात्विकपुराणानि अज्ञान, संशय, विपर्ययनिरसनेन परतत्वादिविशेषनिश्चायकानि ॥

वेदवारिधिः प. रामानुजाचार्यः




pivstrust.org ✉: pivstrust@gmail.com

# चतुर्दश/अष्टादश विद्यास्थानानि

- तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते इति भगवान् पाणिनिः शिक्षायामाह ।
- एवम् वेदचतुष्टय, अङ्गषट्क, उपाङ्गचतुष्टयसहितानि विद्यायाः स्थानानि चतुर्दश सन्ति । एषां धर्मस्थानत्वं सम्यगध्ययनेन धर्मप्राप्तौ उपकारकत्वात् ।
- पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।

  वेदाः स्थानानि विद्याया धर्मस्य च चतुर्दश ॥ इति महर्षिणा याज्ञवल्क्येन ।

तदेतत् सङ्गृहीतं महर्षिणा पराशरेणापि –

- अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ इति । (वि. पु. ३.६.२७)

- आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।

अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥ (वि. पु. ३.६.२८)

# चतुर्दश विद्यास्थानानि

- भारतीयपरम्परायां सर्वेषां चेतन प्रवृत्तिविशेषाणां विभागः स्तरत्रये कृतः – अनुभव, अध्ययन, कौशलस्तरेषु ।
- उपासनासाधनेन आत्मानुभवः प्रथमस्तरीयः यत्र कोऽपि व्यवहारो न भवति । केवलमनुभवः ।
- वेद, वेदाङ्ग, उपाङ्गरूप ज्ञानस्रोतसां विद्यास्थानम् अथवा धर्मस्थानम् इति व्यवहारः - अध्ययनसाध्यानि ।
- अत्र उपवेदानामपि अन्तर्भावः श्रीविष्णुपुराणादिषु व्यक्तम् ।
- चतुःषष्टिप्रकारेण भिन्नाः कलाः 'विद्यान्या शिल्पनैपुणम्' इत्युक्ताः करकौशलादयः ।

pivstrust.org ✉: pivstrust@gmail.com


# चतुर्दश विद्यास्थानानि

- एषु चत्वारः वेदाः ऋक्, यजुस्, साम, अथर्वाख्याः ।
- चतुर्णामपि वेदानां षट् वेदाङ्गानि - शिक्षा (घ्राणम्), व्याकरणम् (मुखम्), छन्दः (पादौ), निरुक्तम् (श्रोत्रम्), ज्यौतिषम् (चक्षुः) तथा कल्पः (हस्तौ) इति ।
- षण्णामपि वेदाङ्गानां चत्वारि उपाङ्गानि - मीमांसा, न्यायविस्तरः, पुराणं तथा धर्मशास्त्रम् इति ।
- उपवेदाः चत्वारः - आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः तथा स्थापत्यम् इति । एषां योगे अष्टादश विद्यास्थानानि स्युः ।





pivstrust.org ✉: pivstrust@gmail.com

# चतुर्दश विद्यास्थानानि

- नैषधे महाकाव्ये नलमहाराजस्य सुशिक्षितत्वस्य वर्णनावसरे श्लेषालङ्कारेण पुनरेकं चतुर्दशत्वं विद्यानामुन्नीतम् कविना - अधीति-बोध-आचरण-प्रचारणैः दशाः चतस्रः प्रणयन् उपाधिभिः । चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥ इति ।
- अत्र विद्यानाम् अध्ययनम्, बोधः, आचरणम् तथा प्रचारणमिति चतस्रः दशाः अवश्यापेक्षिताः इति सूचितम् । अनेन च विद्यास्थानानामेषां धर्मस्थानत्वं सिद्ध्यति । पूर्वोदाहृतश्लोके उत्तरार्धे चतुर्दशसु अयमिति पदच्छेदः ।

वेदवारिधिः प. रामानुजाचार्यः





# लक्षणान्तकक्ष्या - विषयसूची

## १. वेदपरिचयः

विभिन्नशाखानां मन्त्रविभागसङ्ख्यादिकं [देवनागरी मातृका ऋग्वेदीया सङ्ख्याविवरणार्था]

स्वरादिवैशिष्ट्यम् - भूमिकादिभ्यः सङ्ग्राह्यम् । श्रृङ्खलापाठादि, विकृतिपाठ, वर्णक्रमादि अध्ययनक्रमविशेषाः - ऋषि-च्छन्दो-देवता-विनियोगाः

प्रतिपाद्यविषयाः - सूक्तसङ्ग्रहः, ऐतरेयब्राह्मणम्, अनुवाकार्थसङ्ग्रहः, काण्व,माध्यन्दिन,शतपथ-विषयानुक्रमणिका, सामविभागः, पैप्पलाद, शौनक विषयसूची

(सर्वेषां मिलित्वा एकत्र कोष्टकनिर्माणं शक्यम् वा)

वेदवारिधिः प. रामानुजाचार्यः

# वेदस्वरूपं, माहात्म्यञ्च

- शास्त्रन्तु शासनादाहुः भगवच्छासनं श्रुतिः । शास्त्रेणैव च वेद्यत्वं ब्रह्मणस्सूत्रतः स्थिरम् ॥ (७१)
- शास्ता च सर्वविद्बन्धुः पिता मातेत्यधीयते । सुहृन्निवासः शरणं कारणं प्राप्य ईरितः ॥ (७२)
- आप्तोऽयं हितकामश्च तस्मान्निर्दोष आगमः । सुज्ञेयं श्रुतितोऽप्येतत् बहुधोपनिषत्स्वपि ॥ (७३)
- नियोगो ब्रह्मणो वेदः निःश्वासत्वेन च श्रुतः । अप्राकृतस्य शुद्धस्य विरजस्य महेशितुः ॥ (७४)
- तमसः परमस्यायं श्वासत्वाच्छुद्ध एव हि । बृहदारण्यके सम्यक् वेदस्य च शरीरता ॥ (७५)
- परमात्मन उक्ता सा तन्नियाम्यत्वबोधिका । वासभूतश्च वेदोऽयम् ईश्वरस्य तु सर्वदा ॥ (७६)
- तत्स्वरूपस्य गमकः तस्यैव प्रतिपादकः । परश्शतवचोभिर्यत् तद्विष्णोः परमं पदम् ॥ (७७)
- व्यनक्ति विषयस्यैवं विलक्षणतयाऽऽगमः । उत्कृष्टो दोषबाह्यश्च गायत्रीप्रणवादितः ॥ (७८)
- न दोषं सहते कश्चित् कैमुत्याद्यातयामताम् । भगवत्स्तुतिरूपत्वादाम्नानात्तत्पदस्य च ॥ (७९)
- तत्प्राप्तिसाधनत्वाच्च श्रुतेर्नित्यमदुष्टता । तैत्तिरीयत्रयीमूर्ध्नि चेरितं परमं तपः ॥ (८०)
- स्वाध्यायस्तत्प्रवाकश्च पर्यायैर्बहुभिस्तथा । ऋतं सत्यं तपो दान्तिः शमोऽग्निश्चाग्निहोत्रकम् ॥ (८१)
- अतिथयो मानुषश्च प्रजातिः प्रजनः प्रजा । सर्वं स्वाध्याय एवेति श्रुतौ सम्यगुदीरितम् ॥ (८२)
- श्रद्धया तपसा चैष निर्वर्त्य इति शासनात् । दूरेवाचोऽस्य माहात्म्यं दोषगन्धविदूरगम् ॥ (८३)
- वाच्यवाचकसम्बन्धाद्ब्रह्मत्वञ्चास्य युज्यते । एवं स्थितस्य वेदस्य कथं वा यातयामता ॥ (८४)
- दोषमावक्ष्यतीत्येतत् अतस्सम्यग्विचिन्त्यताम् । दिङ्मात्रदर्शनेनैवम् इति वेदस्य शुद्धता ॥ (८५)

वेदवारिधिः प. रामानुजाचार्यः

# प्रतिवेदं विभागाः - संहिताब्राह्मणारण्यकोपनिषत्

## ऋग्वेदः

- शाखाः - शाकलशाखा, शाङ्खायनशाखा ।
- संहिता – शाकलसंहिता, शाङ्खायनसंहिता, बाष्कलसंहिता ।
- ब्राह्मणानि – ऐतरेयब्राह्मणम्, कौषीतकीब्राह्मणम् ।
- आरण्यकम् - ऐतरेयारण्यकम्, कौषीतक्यारण्यकम्, शाङ्खायनारण्यकम् ।
- उपनिषत् - ऐतरेयोपनिषत्, कौषीतक्युपनिषत् ।

## यजुर्वेदः

- शुक्लयजुर्वेदः -
  - शाखाः – काण्वशाखा, माध्यन्दिनशाखा ।
  - संहिता – काण्वसंहिता, माध्यन्दिनसंहिता ।
  - ब्राह्मणानि – शतपथब्राह्मणम् ।
  - आरण्यकम् - बृहदारण्यकम् ।
  - उपनिषत् – बृहदारण्यकोपनिषत्, ईशावास्योपनिषत् ।

# वेदाः

## कृष्णयजुर्वेदः

- शाखाः – तैत्तिरीयशाखा, मैत्रायणीयशाखा, कठशाखा, कपिष्ठलकाठकशाखा ।
- संहिता – तैत्तिरीयसंहिता, मैत्रायणीयसंहिता, कठसंहिता, कपिष्ठलकाठकसंहिता ।
- ब्राह्मणानि – तैत्तिरीयब्राह्मणम्, मैत्रायणीयब्राह्मणम्, काठकब्राह्मणम्, कपिष्ठलकाठकब्राह्मणम् ।
- आरण्यकम् - तैत्तिरीयारण्यकम्, मैत्रायणीयारण्यकम्, काठकारण्यकम् ।
- उपनिषत् – तैत्तिरीयोपनिषत्, श्वेताश्वतरोपनिषत्, कठोपनिषत्, मैत्रायणीयोपनिषत् ।

## सामवेदः


- शाखाः – राणायणीयशाखा, जैमिनीयशाखा, कौथुमशाखा ।
- संहिता – राणायणीयसंहिता, जैमिनीयसंहिता, कौथुमसंहिता ।
- ब्राह्मणानि – पञ्चविंशब्राह्मणम्, आर्षेयब्राह्मणम्, वंशब्राह्मणम्, तलवकारब्राह्मणम्, दैवतब्राह्मणम्, जैमिनीयब्राह्मणम्, उपनिषद्ब्राह्मणम्, षड्विंशब्राह्मणम्, मन्त्रब्राह्मणम्, छान्दोग्यब्राह्मणम्, सामविधानब्राह्मणम्, संहितोपनिषद्ब्राह्मणम्, ताण्ड्यब्राह्मणम् ।
- आरण्यकम् – ताण्ड्यब्राह्मणस्य अन्तिमभागः एव आरण्यकम् ।
- उपनिषत् – केनोपनिषत्, छान्दोग्योपनिषत् ।

# वेदाः

## अथर्ववेदः

- शाखाः – शौनकशाखा, पैप्पलादशाखा ।
- संहिता – शौनकसंहिता, पैप्पलादसंहिता ।
- ब्राह्मणानि – गोपथब्राह्मणम् ।
- आरण्यकम् -
- उपनिषत् – मुण्डकोपनिषत्, माण्डूक्योपनिषत्, प्रश्नोपनिषत् ।

# वेदपरिचयः - वेदशाखाः


वेदशाखाः (११३१)
ऋग्वेदः (२१)
यजुर्वेदः (१०१)
सामवेदः (१०००)
अथर्वणवेदः (९)
शाकल
बाष्कल
आश्वलायन
शुक्लः (१५)
कृष्णः (८६)
काण्व
माध्यन्दिन
तैत्तिरीय
मैत्रायणी
काठक
कपिष्ठल
कौथुम
जैमिनीय
राणायनीय
शौनक
पैप्पलाद





pivstrust.org : pivstrust@gmail.com

# ऋग्वेदसंहितायाः मण्डलरूपेण विभागः

| मण्डलम् | अनुवाकाः | सूक्तानि | मन्त्रसङ्ख्या. | ऋषयः |
|---|---|---|---|---|
| 1 | 24 | 191 | 2006 | शतर्चिनः (नाना ऋषयः). |
| 2 | 4 | 43 | 429 | गृत्समदः |
| 3 | 5 | 62 | 617 | विश्वामित्रः |
| 4 | 5 | 58 | 589 | वामदेवः गोतमश्च |
| 5 | 6 | 87 | 727 | अत्रिः |
| 6 | 6 | 75 | 765 | भरद्वाजः |
| 7 | 6 | 104 | 841 | वसिष्ठः |
| 8 | 10 | 103 | 1716 | कण्वः |
| 9 | 7 | 114 | 1108 | नाना ऋषयः. |
| 10 | 12 | 191 | 1754 | नाना ऋषयः. |
| (आहत्य) | 85 | 1028 | 10552 | |





# ऋग्वेदसंहितायाः अष्टकरूपेण विभागः

अनुवाकाः - 85 । सूक्तानि - 1028 । वर्गाः - 2024 । मन्त्राः - 10552 ॥

| अष्टकम् | अध्यायाः | सूक्तानि | वर्गाः | मन्त्रसङ्ख्या | अक्षरसङ्ख्या |
|---|---|---|---|---|---|
| 1 | 8 | 121 | 265 | 1370 | 48931 |
| 2 | 8 | 119 | 221 | 1147 | 51718 |
| 3 | 8 | 122 | 225 | 1209 | 47636 |
| 4 | 8 | 140 | 250 | 1289 | 49762 |
| 5 | 8 | 129 | 238 | 1263 | 48022 |
| 6 | 8 | 135 | 331 | 1730 | 51456 |
| 7 | 8 | 116 | 248 | 1263 | 47562 |
| 8 | 8 | 146 | 246 | 1281 | 52178 |
| (आहत्य) | 64 | 1028 | 2024 | 10552 | 397265 |

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org ✉: pivstrust@gmail.com


# अष्टकक्रमे वर्गविभागः

| वर्गेषु ऋक्सङ्ख्या | वर्गाणां सङ्ख्या |
|---|---|
| 1-ऋक् वर्गाः | 1 (1.99 सूक्तम्) |
| 2-ऋक् वर्गाः | 2 |
| 3-ऋक् वर्गाः | 97 |
| 4-ऋक् वर्गाः | 174 |
| 5-ऋक् वर्गाः | 1207 |
| 6-ऋक् वर्गाः | 346 |
| 7-ऋक् वर्गाः | 119 |
| 8-ऋक् वर्गाः | 59 |

# ऋग्वेदीयो बाष्कलसंहिताक्रमः

| ऋषयः | प्रारम्भाः | अन्ताः | ऋषयः |
|---|---|---|---|
| मधुच्छन्दा वैश्वामित्रः | अग्निमीळे (१-१-१) | श्रुष्टिमन्तम् (१-९३-१२) | गोतमो राहूगणः |
| कक्षीवान् औशिजः | नासत्याभ्याम् (१-११६-१) | जुषध्वं (१-१३९-११) | परुच्छेपो दैवोदासिः |
| कुत्स आङ्गिरसः | इमं स्तोम (१-९४-१) | उतद्यौः (१-११५-६) | कुत्स आङ्गिरसः |
| दीर्घतमा औचथ्यः | वेदिषदे प्रिय (१-१४०-१) | हरिश्रियम् (८-५०-१०) | पुष्टिगुः काण्वः |
| भर्गः प्रागाथः | अग्न आयाह्य (८-६०-१) | सोमस्यपीतये (८-९४-१२) | बिन्दुराङ्गिरसः |
| श्रुष्टिगुः काण्वः | यथा मनौ (८-५१-१) | चनसंनशे (८-५५-५) | कृशः काण्वः |
| तिरश्चाङ्गिरसः | आ त्वा गिरो (८-१५-१) | विघ्ननेकम् (१०-८८-१८) | मूर्धन्वानाङ्गिरसः: |
| मेध्यः काण्वः | एक एवाग्नि (८-५२-२) | सर्वम् (८-५८-२) | मेध्यः काण्वः |
| मेध्यः काण्वः | यमृत्विजो (८-५८-१) | संवित् (८-५८-१) | मेध्यः काण्वः |
| मूर्धन्वानाङ्गिरसः | यावन्मात्रमुषसो (१०-८८-१९) | सुसहासति (१०-१९१-४) | संवनन आङ्गिरसः |
| | संज्ञानमुशना | चतुष्पदे (15 ऋचः (परिशिष्टं 36) ) | |

वेदवारिधिः प. रामानुजाचार्यः

# ऋग्वेदीयः शाङ्खायनसंहिताक्रमः

| मन्त्रप्रतीकम् | क्र.सं. |
|---|---|
| संज्ञानमुशना | 1 |
| संज्ञानं वः | 2 |
| यत् कक्षीवाँ | 3 |
| सं वो मनांसि | 4 |
| तच्छंयोरा वृणीमहे | 15 (1) |
| नैर्हस्त्यं सेनादरणं | 5 |
| परिवर्त्मान्येषा | 6 |
| ऐषु नह्यवृषा | 7 (2) |
| प्राध्वराणां | 8 |

| मन्त्रप्रतीकम् | क्र.सं. |
|---|---|
| गोकामो अन्नकामः | 9 |
| यदक्षरं भूतकृतं | 10 |
| जमदग्निराप्यायते | 11 |
| शिवा नः प्रदिशः सत्या नः प्रदिशो दिशः | 12 (3) |
| अजो यत्तेजो ददृशे शुक्रं ज्योतिः परो गुहा | 12 |
| यदृषिः कश्यपः | 13 |
| यद्देवानां त्र्यायुषं | 15 |
| तच्छंयोरा वृणीमहे | 15 (4) |

| प्रारम्भाः |
|---|
| अग्निमीळे (१-१-१) |
| अभि प्र वः (८-४९-१) |
| अग्न आ याह्य (८-६०-१) |
| अन्ताः |
| वा पुरस्तात् (८-४८-१५) |
| न आयुः (८-५९-७) |
| सु सहासति (१०-१९१-४) |

1. एते सर्वे परिशिष्टं 36 मध्ये अन्तर्गताः
2. शांखायनीये ऋग्वेदे वालखिल्यसूक्तानि संहितान्तर्गतान्येव सन्ति ।

वेदवारिधिः प. रामानुजाचार्यः





# ऋग्वेदीयशाखाविवरणम्

## शाकलशाखा

- १. मुद्गलशाखा
- २. गालवशाखा
- ३. शालीयशाखा
- ४. वात्स्यशाखा
- ५. शैशिरिशाखा

## बाष्कलशाखा

- ६. बौध्यशाखा
- ७. अग्निमाठरशाखा
- ८. पराशरशाखा
- ९. जातूकर्ण्यशाखा

## १०. आश्वलायनशाखा

वेदवारिधिः प. रामानुजाचार्यः

# ऋग्वेदीयशाखाविवरणम्

## शाङ्खायनशाखा

- ११. शाङ्खायनशाखा
- १२. कौषीतकिशाखा
- १३. महाकौषीतकिशाखा
- १४. शाम्बव्यशाखा

१५. माण्डूकेयशाखा

१६. बह्वृचशाखा

१७. पैङ्ग्यशाखा

१८. उद्दालक=गोतम=अरुणशाखा

१९. शतबलाक्षशाखा

२०. गज=हास्तिकशाखा





# ऋग्वेदीयशाखाविवरणम्

## बाष्कलिभरद्वाजशाखा

- २१. आपनीप
- २२. पन्नगारि
- २३. आर्जव


## २४. ऐतरेयशाखा

## २५. वासिष्ठशाखा

## २६. सुलभशाखा

## २७. शौनकशाखा

# ऋग्वेदशाखाः



पैलः
इन्द्रप्रमतिः
बाष्कलः
माण्डूकेयः
बाध्यः
अग्निमाठरः
पराशरः
जातूकर्ण्यः
सत्यश्रवाः
सत्यहितः
सत्यश्रियः
देवमित्रशाकल्यः
रथीतरशाकपूणिः
बाष्कलिभरद्वाजः
मुद्गलः
गालवः
खालीयः
वात्स्यः
शैशिरिः





pivstrust.org : pivstrust@gmail.com

# ऋग्वेदस्य ब्राह्मणानि तथा आरण्यकानि

1. ब्राह्मणशब्दार्थविवरणम्
2. द्विविधानि ब्राह्मणानि
3. अनुब्राह्मणम्
4. ऋग्वेदस्य ब्राह्मणानि
   1. ऐतरेयब्राह्मणम्
   2. कौषीतकीब्राह्मणम्
   3. ऐतरेयारण्यकम्
   4. शाङ्खायन अथवा कौषीतकि आरण्यकम्

(एषां विषये मैसूरुनगरात् कन्नडानुवादेन मुद्रितऋग्वेदग्रन्थाः दृश्याः) (पृष्ठाङ्काः 201-208)





# शुक्लयजुःशाखाः (१५)

## शुक्लयजुर्वेद-वाजसनेयसंहितायाः १५ शाखाः

- १. जाबालाः
- २. बौधेयाः
- ३. काण्वाः
- ४. माध्यन्दिनाः
- ५. शापेयाः
- ६. तापायनीयाः
- ७. कापोलाः
- ८. पौण्ड्रवत्साः

९. आवटिकाः
१०. परमावटिकाः
११. पाराशराः
१२. वैनतेयाः
१३. वैधेयाः
१४. कौन्तेयाः
१५. बैजवापाः





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)

pivstrust.org : pivstrust@gmail.com

# काण्वशाखासंहिताभागपरिचयः

| अध्यायसङ्ख्या | विषयः |
|---|---|
| 1-2 | दर्शपूर्णमासौ |
| 3 | अन्वाधानाग्निहोत्राग्न्युपस्थानचातुर्मास्यानि |
| 4-9 | अग्निष्टोमः |
| 10 | वाजपेयः |
| 11 | राजसूयः |
| 12-20 | अग्निचयनम् |
| 21-23 | सौत्रामणी |
| 24-27 | अश्वमेधः |
| 28-33 | तत्र तत्र विप्रकीर्णा लिङ्गविनियोज्या अनारभ्याधीता मन्त्राः |
| 34-35 | पुरुषमेधः |
| 36-39 | प्रवर्ग्यः |
| 40 | ब्रह्मविद्या |





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org
: pivstrust@gmail.com

# काण्वशाखासंहिताभागेयत्ता

| अध्यायः | अनुवाकः | मन्त्राः |
|---|---|---|
| 1 | 10 | 50 |
| 2 | 7 | 60 |
| 3 | 9 | 76 |
| 4 | 10 | 49 |
| 5 | 10 | 55 |
| 6 | 8 | 50 |
| 7 | 22 | 40 |
| 8 | 22 | 32 |
| 9 | 7 | 46 |
| 10 | 6 | 43 |
| | **111** | **501** |

| अध्यायः | अनुवाकः | मन्त्राः |
|---|---|---|
| 11 | 10 | 47 |
| 12 | 7 | 85 |
| 13 | 7 | 116 |
| 14 | 7 | 65 |
| 15 | 9 | 35 |
| 16 | 7 | 85 |
| 17 | 8 | 64 |
| 18 | 7 | 86 |
| 19 | 9 | 43 |
| 20 | 5 | 46 |
| | **76** | **672** |

वेदवारिधिः प. रामानुजाचार्यः





# काण्वशाखासंहिताभागेयत्ता

| अध्यायः | अनुवाकः | मन्त्राः | अध्यायः | अनुवाकः | मन्त्राः |
|---|---|---|---|---|---|
| 21 | 7 | 106 | 31 | 7 | 51 |
| 22 | 8 | 75 | 32 | 6 | 84 |
| 23 | 6 | 60 | 33 | 2 | 46 |
| 24 | 21 | 47 | 34 | 4 | 22 |
| 25 | 10 | 67 | 35 | 4 | 55 |
| 26 | 8 | 44 | 36 | 1 | 24 |
| 27 | 15 | 45 | 37 | 3 | 20 |
| 28 | 12 | 14 | 38 | 7 | 27 |
| 29 | 6 | 50 | 39 | 9 | 12 |
| 30 | 4 | 46 | 40 | 1 | 18 |
| | **97** | **554** | | **44** | **359** |

वेदवारिधिः प. रामानुजाचार्यः

# काण्वशाखासंहिताभागेयत्ता

| दशकाः | अनुवाकाः | मन्त्राः |
|---|---|---|
| 1 | 111 | 501 |
| 2 | 76 | 672 |
| 3 | 97 | 554 |
| 4 | 44 | 359 |
| | **328** | **2086** |

# काण्वशतपथब्राह्मणविषयाः

| काण्डानि | निरूपिताः विषयाः |
|---|---|
| १. एकपात् काण्डम् | आधानपुनराधाने, अग्निहोत्रम्, आग्रयणम्, पिण्डपितृयज्ञः, दाक्षायणयज्ञः, उपस्थानादि, चातुर्मास्ययागः । |
| २. हविर्यज्ञकाण्डम् | दर्शपूर्णमासेष्टिः । |
| ३. उद्धारिकाण्डम् | अग्निहोत्रसंबन्धी अर्थवादः, दर्शपूर्णमासीयोऽर्थवादश्च । |
| ४. अध्वरकाण्डम् | सोमयागदीक्षा अभिषवादिकर्म च । |
| ५. ग्रहकाण्डम् | सोमयागः, सवनत्रयगतं कर्म, षोडशीप्रभृति सोमसंस्थाः, द्वादशाहयागः त्रिरात्राहीनदक्षिणा चतुस्त्रिंशद्धोमः, सत्रधर्माश्च । |
| ६. वाजपेयकाण्डम् | वाजपेययागः सपरिकरः । |
| ७. राजसूयकाण्डम् | राजसूययागः सपरिकरः । |
| ८. उखासंभरणकाण्डम् | उखासंभरणम् । |
| ९. हस्तिघटकाण्डम् | चयनक्रतुः । |

# काण्वशतपथब्राह्मणविषयाः

| काण्डानि | निरूपिताः विषयाः |
|---|---|
| १०. चितिकाण्डम् | चयनक्रतुः । |
| ११. साग्निचितिकाण्डम् | चयनक्रतुः । |
| १२. अग्निरहस्यकाण्डम् | चयनक्रतुः । |
| १३. अष्टाध्यायीकाण्डम् | आधानकालः, पथिकृदिष्टिः, प्रयाजानुमन्त्रणम्, शंयुवाकः, पत्नीसंयाजः, ब्रह्मचर्यम्, दर्शपूर्णमासशेषः, पशुबन्धश्च । |
| १४. मध्यमकाण्डम् | दीक्षाक्रमः, पृष्ठ्याभिप्लवादिसौत्रामणीयागः, अग्निहोत्रप्रायश्चित्तम्, मृतकाग्निहोत्रम् । |
| १५. अश्वमेधकाण्डम् | अश्वमेधः । |
| १६. प्रवर्ग्यकाण्डम् | साङ्गोपाङ्गं प्रवर्ग्यं कर्म । |
| १७. बृहदारण्यकोपनिषत् | ब्रह्मविद्या |

# माध्यन्दिनशाखासंहिताभागेयत्ता

| अध्यायाः | अनुवाकाः | मन्त्राः | ऋक् | यजुः |
|---|---|---|---|---|
| 1 | 10 | 31 | 1 | 117 |
| 2 | 7 | 34 | 12 | 76 |
| 3 | 10 | 63 | 63(62) | 34(36) |
| 4 | 10 | 37 | 21(20) | 65(66) |
| 5 | 10 | 43 | 17 | 115 |
| 6 | 8 | 37 | 17 | 83 |
| 7 | 25 | 48 | 30 | 111 |
| 8 | 23 | 63 | 43 | 103(104) |
| 9 | 8 | 40 | 22 | 84 |
| 10 | 8 | 34 | 12 | 102 |





pivstrust.org : pivstrust@gmail.com

# माध्यन्दिनशाखासंहिताभागेयत्ता

| अध्यायाः | अनुवाकाः | मन्त्राः | ऋक् | यजुः |
|---:|---:|---:|---:|---:|
| 11 | 7 | 83 | 76 | 26 |
| 12 | 7 | 117 | 114 | 12 |
| 13 | 7 | 58 | 52 | 87 |
| 14 | 8 | 31 | 17 | 154 |
| 15 | 7 | 65 | 46 | 90 |
| 16 | 9 | 66 | 33 | 129 |
| 17 | 9 | 99 | 95 | 11 |
| 18 | 13 | 77 | 36 | 368 |
| 19 | 7 | 95 | 94 | 30 |
| 20 | 9 | 90 | 84 | 14 |

# माध्यन्दिनशाखासंहिताभागेयत्ता

| अध्यायाः | अनुवाकाः | मन्त्राः | ऋक् | यजुः |
|---|---|---|---|---|
| 21 | 6 | 61 | 28 | 33 |
| 22 | 19 | 34 | 13 | 113 |
| 23 | 11 | 65 | 58 | 24 |
| 24 | 4 | 40 | 0 | 40 |
| 25 | 15 | 47 | 43 | 0 |
| 26 | 2 | 26 | 25 | 15 |
| 27 | 4 | 45 | 44 | 1 |
| 28 | 4 | 46 | 0 | 46 |
| 29 | 4 | 60 | 57 | 32 |
| 30 | 2 | 22 | 3 | 177 |

pivstrust.org : pivstrust@gmail.com

# माध्यन्दिनशाखासंहिताभागेयत्ता

| अध्यायाः | अनुवाकाः | मन्त्राः | ऋक् | यजुः |
|---|---|---|---|---|
| 31 | 2 | 22 | 22 | 0 |
| 32 | 2 | 16 | 25 | 0 |
| 33 | 7 | 97 | 119 | 0 |
| 34 | 6 | 58 | 62 | 0 |
| 35 | 2 | 22 | 21 | 6 |
| 36 | 2 | 24 | 20 | 22 |
| 37 | 2 | 21 | 5 | 31 |
| 38 | 3 | 28 | 13(14) | 52 |
| 39 | 2 | 13 | 2 | 107 |
| 40 | 2 | 17 | 17 | 7 |
| | **303** | **1975** | | |

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org ✉: pivstrust@gmail.com


# माध्यन्दिनशतपथब्राह्मणविषयाः

| काण्डानि | निरूपिताः विषयाः |
|---|---|
| १. हविर्यज्ञकाण्डम् | दर्शपूर्णमासेष्टिः । |
| २. एकपादिकाकाण्डम् | आधानपुनराधाने, अग्निहोत्रम्, उपस्थानम्, प्रवत्स्यदुपस्थानम्, आगतोपस्थानादि, पिण्डपितृयज्ञः, आग्रयणम्, दाक्षायणयज्ञः, चातुर्मास्ययागः । |
| ३. अध्वरकाण्डम् | सोमयागो दीक्षाभिषवपर्यन्तः । |
| ४. ग्रहकाण्डम् | सोमयागे सवनत्रयगतं कर्म, षोडशीप्रभृतिसोमसंस्थाः, द्वादशाहयागः, त्रिरात्राहीनदक्षिणा, सत्रधर्माः । |
| ५. सवकाण्डम् | वाजपेययागो राजसूययागश्च । |
| ६. उखासंभरणकाण्डम् | उखासंभरणम्, विष्णुक्रमः, वात्सप्रोपस्थानम्, वनीवाहनकम् । |
| ७. हस्तिघटकाण्डम् | चयनयागः, गार्हपत्यचयनम्, निर्ऋतिचयनम्, अग्निक्षेत्रसंस्कारः दर्भस्तंबाद्यपस्यासादनान्तं कर्म । |
| ८. चितिकाण्डम् | प्राणभृत्सादनादि चयनसमाप्तिपर्यन्तम् । |





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org ✉: pivstrust@gmail.com



# माध्यन्दिनशतपथब्राह्मणविषयाः

| काण्डानि | निरूपिताः विषयाः |
|---|---|
| ९. संचितिकाण्डम् | शतरुद्रीयहोमादि, धिष्ण्यचयनं, पुनश्चितिः, चित्युपस्थानम् । |
| १०. अग्निरहस्यकाण्डम् | चितिसंपत्तिः, चयनस्तुतिः, चित्यपक्षपुच्छविचारः, चित्याग्निवेदि-मानम्, लोकादिरूपेणाग्नेरुपासनम्, संप्रदायप्रवर्तकऋषिवंश इत्यादि । |
| ११. अष्टाध्यायीकाण्डम् | आधानकालः, पथिकृदिष्टिः, अभ्युदितेष्टिः, दर्शपूर्णमासाग्निहोत्रा-र्थवादः, ब्रह्मचारिणः कर्तव्यम्, मित्रविन्देष्टिः, चातुर्मास्यार्थवादः, पञ्च महायज्ञाः, स्वाध्यायप्रशंसा प्रायश्चित्तिः, अध्यात्मविद्या, पशुबन्धप्रशंसा, षड्ढोतृहोमः इत्यादि । |
| १२. मध्यमकाण्डम् | सत्रदीक्षाक्रमः, सत्राणि, गवामयनम्, अग्निहोत्रप्रायश्चित्तम्, सौत्रामणीयागः, मृतकाग्निहोत्रादि । |
| १३. अश्वमेधकाण्डम् | अश्वमेधः - तद्गतप्रायश्चित्तम्, पुरुषमेधः, सर्वमेधः, पितृमेधश्च |
| १४. बृहदारण्यकोपनिषत् | प्रवर्ग्यकर्म, ब्रह्मविद्या च इति । |







# कृष्णयजुर्वेदशाखाः (८६)

- कृष्णयजुर्वेदशाखाः ८६, वायुपुराणे ब्रह्माण्डपुराणे च एवमुक्तः
- वैशंपायनगोत्रोऽसौ यजुर्वेदं व्यकल्पयत् ।
  षडशीतिस्तु येनोक्ताः संहिता यजुषां शुभाः ॥
- षडशीतिस्तथा शिष्याः संहितानां विकल्पकाः ।
  सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः ॥
- वैशंपायनलौहित्यौ कठकालापशावधः ।
  श्यामायनिः पलङ्गश्च ह्यालम्बिः कामलायनिः ।
  तेषां शिष्याः प्रशिष्याश्च षडशीतिः श्रुतर्षयः ॥
- ८६ संहितासु बह्व्यः लुप्ताः । ४१ शाखानां नामैवोपलभ्यते ।





# कृष्णयजुर्वेदशाखाः (८६)

- १. चरकसंहिता
- २. आलम्बिनशाखा
- ३. पालङ्गिनशाखा
- ४. कमलशाखा
- ५. आर्चाभिनशाखा
- ६. आरुणिनशाखा (आसुरिशाखा)
- ७. ताण्डिनशाखा
- ८. श्यामायनशाखा
- ९. कठ / काठकशाखा
- १०. कालापशाखा
- ११. हारिद्रवीयशाखा
- १२. छागलेयशाखा
- १३. तुम्बुरुशाखा
- १४. उलपशाखा
- १५. आह्वरकशाखा
- १६. प्राच्यकठशाखा
- १७. कपिष्ठलशाखा
- १८. चारायणीशाखा
- १९. वारायणीयशाखा
- २०. वार्तन्तवीयशाखा
- २१. श्वेताश्वतरशाखा
- २२. औपमन्यवशाखा
- २३. पाताण्डनीयशाखा
- २४. मैत्रायणीयशाखा
- २५. मानवशाखा
- २६. वाराहशाखा
- २७. दुन्दुभशाखा
- २८. ऐकेयशाखा

# कृष्णयजुर्वेदशाखाः (८६)

- २९. तैत्तिरीयशाखा
- ३०. औखेयशाखा
- ३१. आत्रेयशाखा
- ३२. वैखानसशाखा
- ३३. खाण्डिकीयशाखा
- ३४. आपस्तम्बशाखा
- ३५. बोधायनशाखा
- ३६. सत्याषाढशाखा
- ३७. हिरण्यकेशीयशाखा
- ३८. औधेयीशाखा
- ३९. कौण्डिन्यशाखा
- ४०. अग्निवेशशाखा
- ४१. हारीतशाखा





pivstrust.org     : pivstrust@gmail.com

# तैत्तिरीयकृष्णयजुर्वेदः - आर्षेयक्रमपाठः - बोधायनगृह्यानुसारि

**1.0 प्राजापत्यकाण्डम्**
- 1.1 पौरोडाशिकः
- 1.2 याजमानः
- 1.3 होतृ
- 1.4 हौत्रम्
- 1.5 पितृमेधः

**2.0 सौम्यकाण्डम्**
- 2.1 आध्वर्यवम्
- 2.2 ग्रहः
- 2.3 दाक्षिणानि
- 2.4 समिष्टयजूंषि
- 2.5 अवभृथयजूंषि
- 2.6 वाजपेयः
- 2.7 शुक्रियाणि
- 2.8 सवाः

**3.0 आग्नेयं काण्डम्**
- 3.1 अग्न्याधेयम्
- 3.2 पुनराधेयम्
- 3.3 अग्निहोत्रम्
- 3.4 अग्न्युपस्थानम्
- 3.5 अग्निचयनम्
- 3.6 सावित्रम्
- 3.7 नाचिकेतम्
- 3.8 चातुर्होत्रीयम्
- 3.9 वैश्वसृजम्
- 3.10 आरुणम्

**4.0 वैश्वदेवकाण्डम्**
- 4.1 राजसूयः
- 4.2 पशुबन्धः
- 4.3 काम्येष्टयः
- 4.4 नक्षत्रेष्टयः
- 4.5 दिवःश्येनयः
- 4.6 अपाघाः
- 4.7 सात्रायणम्
- 4.8 उपहोमाः
- 4.9 कौलिकी
- 4.10 सूक्तानि
- 4.11 औपानुवाक्यम्
- 4.12 याज्या
- 4.13 अश्वमेधः
- 4.14 पुरुषमेधः
- 4.15 सौत्रामणी
- 4.16 अच्छिद्राणि
- 4.17 पशुहौत्रम्

**5.0 स्वायम्भुवकाण्डम्**
- 5.1 स्वाध्यायब्राह्मणम्

वेदवारिधिः प. रामानुजाचार्यः

# तैत्तिरीयकाण्डानुक्रमणिका

बोधायनीये गृह्यसूत्रे तृतीयप्रश्ने प्रथमाध्याये तावत् 'हुतानुकृतिरुपाकर्मे'त्यारभ्य, अष्टादशात् सूत्रात् परं काण्डऋषिः प्रक्रान्तः । तत्र –

3.1.21 पौरोडाशिकं याजमानं होतारो हौत्रं पैतृमेध (पितृमेधः) इति सब्राह्मणानि सानुब्राह्मणानि प्राजापत्यानि ॥

3.1.22 आध्वर्यवं ग्रहा दाक्षिणानि समिष्टयजूंषि अवभृथयजूंषि वाजपेयश्शुक्रियाणि सवाः इति सब्राह्मणानि सानुब्राह्मणानि सौम्यानि ॥

3.1.23 अग्न्याधेयमग्निहोत्रमग्न्युपस्थानमग्निचयनं सावित्रं नाचिकेतं चातुर्होत्रीयं वैश्वसृजमारुणाः इति सब्राह्मणानि सानुब्राह्मणान्याग्नेयानि ॥

3.1.24 राजसूयः पशुबन्धः इष्टयो नक्षत्रेष्टयो दिवःश्येनयोऽपाघाः सात्रायणमुपहोमाः कौकिली (कौलिकी) सूक्तान्यौपानुवाक्यं याज्याऽश्वमेधः पुरुषमेधः सौत्रामण्यच्छिद्राणि पशुहौत्रमुपनिषदः इति सब्राह्मणानि सानुब्राह्मणानि वैश्वदेवानि ॥

3.1.25 स्वायम्भुवं काण्डं काठके पठितो विधिः । स्वयम्भूश्चात्र दैवतं सर्वभूतपतिश्शुचिरिति ॥ इत्यार्षेयक्रमेण तैत्तिरीयशाखायाः काण्डविभागः कृतः ॥

(श्रीपाददामोदरसातवळेकरमहोदयैश्च स्वाध्यायमण्डलतः मुद्रिततैत्तिरीयसंहितायां एष क्रमः विस्तरेण प्रदर्शितः।)

वेदवारिधिः प. रामानुजाचार्यः

# तैत्तिरीयकाण्डानुक्रमणिका

## अथ प्रथमोऽध्यायः

पुरोडाशीयमध्वरग्रहदाक्षिणानि अग्न्याधेयपुनराधेयाग्न्युपस्थानमैष्टिकं याजमानं तद्विधिः वाजपेयन्तद्विधी राजसूयः काम्याः पशवश्चेष्टयो दार्शं ब्राह्मणमुपानुवाक्यमग्निस्तद्विधिर्द्वे काण्डे पूर्वं द्विचत्वारिंशिकमुत्तरं त्रैंशिकं तदग्न्युपानुवाक्यमित्याचक्षते । अध्वरादीनां त्रयाणां विधिर्याज्या राजसूयविधिस्सत्रायणमश्वमेधस्तस्य क्रमः (क) पञ्चादौ सात्रिका दशिन्योऽनुवाकोनाः (ख) षडनुवाकमाग्निकमहापृष्ठं नाम (ग) द्वे त्रैंशिके दशिन्यौ (घ) त्र्यनुवाकं द्विचत्वारिंशिकं दहरपृष्ठं नाम (ङ) त्रैंशिकोत्तमा दशिनी (च) द्विचत्वारिंशिकानुवाकौ (छ) दशिन्युत्तमश्च प्रवर्ग्यस्तद्विधिरग्निहोत्रविधिः होतारस्तद्विधिः उपहोमाः कौकिलीः सवाः सूक्तानि नक्षत्रेष्टयः पुरोडाशविधिः नृमेधपितृमेधौ दार्शं हौत्रं पाशुकश्चाच्छिद्रकाण्डमश्वमेधविधिरित्येतानि(वन्ति) शाखाकाण्डानि उपनिषदः वेदान्ताः त्रय्यः सांहित्यः याज्ञिक्यः वारुण्यश्चेति एतावन्ति तित्तिरिः प्रोवाच ॥ अथाष्टककाठकानि सावित्रनाचिकेतचातुर्होत्रवैश्वसृजारुणाः पञ्च चितयो दिवःश्येनयोऽपाघाश्चेष्टयः स्वाध्यायब्राह्मणमष्टमम् ॥

इति प्रथमोऽध्यायः ॥

वेदवारिधिः प. रामानुजाचार्यः







# तैत्तिरीयकाण्डानुक्रमणिका

**अथ द्वितीयोऽध्यायः**

2.1 शाखादिं याजमानं च होतॄन् हौत्रं च दार्शिकम् । तद्विधीन् पितृमेधं च नवाहुः कस्य तद्विदः ॥1॥
2.2 अध्वरप्रभृतित्रीणि तद्विधिर्वाजपेयके । सवाः शुक्रियकाण्डे च नवेन्दोरिति धारणा ॥2॥
2.3 त्रिष्वग्न्याधेयपूर्वेषु ह्यग्नौ च सविधिद्वये । विधौ चैवाग्निहोत्रस्य सप्तस्वग्निमृषिं विदुः ॥3॥
2.4 अवशिष्टानि यानि स्युः काण्डान्यन्यानि षोडश । विश्वान्देवानृषींस्तेषु विदुर्वेदविदो जनाः ॥4॥
2.5 सब्राह्मणो राजसूयः पशुबन्धस्सहेष्टिभिः । उपानुवाक्यं याज्याश्च अश्वमेधस्सब्राह्मणः ॥5॥
2.6 सात्रायणं चोपहोमाः सूक्तानि च सहेष्टिभिः । सौत्रामणी सहाच्छिद्रैः हौत्रं मेधश्च षोडश ॥6॥
2.7 काण्डनामोपनिषत्सु काठकाग्निषु हव्यवाट् । तदिष्टिकाण्डयोर्विश्वे ब्रह्माम्नायविधावृषिः ॥7॥
2.8 ऐकाग्निको विधिः काण्डं वैश्वदेवमिति स्थितिः ॥ आरण्यको विधिः काण्डमरुणास्तत्र दैवतम् ॥8॥
2.9 काण्डशेषान् यथाकाण्डं विदध्यात्तु विचक्षणः । यथा सारस्वते पाठे ज्ञानमात्रमिहोच्यते ॥9॥
2.10 अथ काण्डऋषीनेतान् उदकाञ्जलिभिः शुचिः । अव्यग्रस्तर्पयेन्नित्यं अन्नैः पर्वाष्टमीषु च ॥10॥
2.11 काण्डोपाकरणेष्वेतान् पुरस्तात्सदसस्पतेः । जुहुयात्काण्डसमाप्तौ च श्रुतिरेषा सनातनी ॥11॥

**इति द्वितीयोऽध्यायः ।**

वेदवारिधिः प. रामानुजाचार्यः

# तैत्तिरीयसंहितेयत्ता

## प्रथमः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 14 | 28 | 1530 |
| 2 | 14 | 34 | 1690 |
| 3 | 14 | 31 | 1567 |
| 4 | 46 | 54 | 1810 |
| 5 | 11 | 51 | 2717 |
| 6 | 12 | 51 | 2509 |
| 7 | 13 | 51 | 2655 |
| 8 | 22 | 42 | 2094 |
| **8** | **146** | **342** | **16572** |

## द्वितीयः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 11 | 65 | 3278 |
| 2 | 12 | 71 | 3526 |
| 3 | 14 | 56 | 2965 |
| 4 | 14 | 48 | 2406 |
| 5 | 12 | 74 | 3665 |
| 6 | 12 | 70 | 3433 |
| **6** | **75** | **384** | **19273** |

# तैत्तिरीयसंहितेयत्ता

तृतीयः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 11 | 42 | 2248 |
| 2 | 11 | 46 | 2335 |
| 3 | 11 | 36 | 1857 |
| 4 | 11 | 46 | 2392 |
| 5 | 11 | 36 | 1790 |
| **5** | **55** | **206** | **10622** |

चतुर्थः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 11 | 46 | 2293 |
| 2 | 11 | 48 | 2498 |
| 3 | 13 | 36 | 1844 |
| 4 | 12 | 37 | 1887 |
| 5 | 11 | 27 | 1234 |
| 6 | 9 | 46 | 2331 |
| 7 | 15 | 39 | 2008 |
| **7** | **82** | **279** | **14095** |

# तैत्तिरीयसंहितेयत्ता

पञ्चमः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 11 | 59 | 3081 |
| 2 | 12 | 64 | 3195 |
| 3 | 12 | 48 | 2477 |
| 4 | 12 | 58 | 2906 |
| 5 | 24 | 62 | 2727 |
| 6 | 23 | 54 | 2436 |
| 7 | 26 | 58 | 2582 |
| **7** | **120** | **403** | **19404** |

षष्ठः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 11 | 76 | 3840 |
| 2 | 11 | 59 | 3085 |
| 3 | 11 | 62 | 3155 |
| 4 | 11 | 51 | 2626 |
| 5 | 11 | 42 | 2150 |
| 6 | 11 | 43 | 2125 |
| **6** | **66** | **333** | **16981** |

वेदवारिधिः प. रामानुजाचार्यः

# तैत्तिरीयसंहितारण्यकेयत्ता

## सप्तमः काण्डः

| प्रश्नः | अनुवाकाः | पञ्चाशत् | पदानि |
|---|---|---|---|
| 1 | 20 | 52 | 2635 |
| 2 | 20 | 50 | 2330 |
| 3 | 20 | 42 | 2123 |
| 4 | 22 | 53 | 2621 |
| 5 | 25 | 54 | 2631 |
| **5** | **107** | **251** | **12340** |
| आहत्य संहितायाम् | | | |
| **44** | **651** | **2198** | **109287** |

## आरण्यकम् (द्राविडपाठानुसारम्)

| प्रपाठकः | अनुवाकाः | दशिन्यः | वाक्यानि |
|---|---|---|---|
| 1 | 32 | 131 | 1396 |
| 2 | 19 | 22 | 115 |
| 3 | 21 | 52 | 501 |
| 4 | 12 | 27 | 280 |
| 5 | 15 | 42 | 626 |
| 6 | 64 | 79 | 362 |
| 7 | 42 | 93 | 839 |
| 8 | 12 | 108 | 1137 |
| **8** | **217** | **554** | **5256** |

वेदवारिधिः प. रामानुजाचार्यः

# तैत्तिरीयब्राह्मणेयत्ता

## प्रथमाष्टकम्

| प्रश्नः | अनुवाकाः | दशिन्यः | वाक्यानि |
|---|---|---|---|
| 1 | 10 | 80 | 831 |
| 2 | 6 | 50 | 521 |
| 3 | 10 | 65 | 666 |
| 4 | 10 | 66 | 690 |
| 5 | 12 | 59 | 662 |
| 6 | 10 | 75 | 786 |
| 7 | 10 | 64 | 677 |
| 8 | 10 | 37 | 409 |
| **8** | **78** | **496** | **5242** |

## द्वितीयाष्टकम्

| प्रश्नः | अनुवाकाः | दशिन्यः | वाक्यानि |
|---|---|---|---|
| 1 | 11 | 60 | 626 |
| 2 | 11 | 73 | 768 |
| 3 | 11 | 50 | 547 |
| 4 | 8 | 80 | 826 |
| 5 | 8 | 45 | 475 |
| 6 | 20 | 94 | 1042 |
| 7 | 18 | 66 | 699 |
| 8 | 9 | 79 | 812 |
| **8** | **96** | **547** | **5795** |

# तैत्तिरीयब्राह्मण-काठक-एकाग्निकाण्ड-इयत्ता

## तृतीयाष्टकम्

| प्रश्नः | अनुवाकाः | दशिन्यः | वाक्यानि |
|---|---|---|---|
| 1 | 6 | 63 | 657 |
| 2 | 10 | 85 | 873 |
| 3 | 11 | 79 | 823 |
| 4 | 19 | 19 | 187 |
| 5 | 13 | 30 | 343 |
| 6 | 15 | 37 | 387 |
| 7 | 14 | 130 | 1353 |
| 8 | 23 | 91 | 999 |
| 9 | 23 | 84 | 908 |
| **9** | **134** | **620** | **6530** |
| आहत्य ब्राह्मणे | | | |
| **25** | **308** | **1663** | **17567** |

## काठकम्

| प्रश्नः | अनुवाकाः | दशिन्यः | वाक्यानि |
|---|---|---|---|
| 1 | 11 | 49 | 526 |
| 2 | 10 | 62 | 593 |
| 3 | 9 | 56 | 697 |
| **3** | **30** | **167** | **1816** |

## एकाग्निकाण्डः

| प्रश्नः | खण्डाः | दशिन्यः | वाक्यानि |
|---|---|---|---|
| 1 | 18 | 18 | 295 |
| 2 | 22 | 22 | 459 |
| **2** | **40** | **40** | **754** |

वेदवारिधिः प. रामानुजाचार्यः

# तैत्तिरीयशाखायाः संहतग्रन्थसङ्ख्या

| | प्रश्नाः | अनुवाकाः | पञ्चाशतः | पदानि/वाक्यानि |
|---|---|---|---|---|
| संहिता | 44 | 651 | 2198 | 109287 |
| ब्राह्मणे (अष्टकानि) | 25 | 308 | 1663 | 17567 |
| ब्राह्मणे काठकम् | 3 | 30 | 167 | 1816 |
| आरण्यकम् (उपनिषच्च) | 8 | 217 | 554 | |
| एकाग्निकाण्डम् | 2 | 40 | 40 | 754 |
| | **82** | **1246** | **4622** | |





pivstrust.org : pivstrust@gmail.com

# सामवेदस्य प्रधानशाखा(संहिता)नां नामानि

- १. कौथुमाः
- २. जैमिनीयाः
- ३. राणायनीयाः
- ४. सात्यमुग्राः
- ५. नैगेयाः
- ६. शार्दूलाः
- ७. वार्षगण्याः
- ८. गौतमाः
- ९. भाल्लविनः
- १०. कालबविनः
- ११. शाट्यायनिनः
- १२. रौरुकिणः
- १३. कापेयाः
- १४. माषशराव्यः
- १५. करद्विषः
- १६. शाण्डिल्याः
- १७. ताण्ड्याः






**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org : pivstrust@gmail.com

# सामवेदसंहिताविभागः




वेदवारिधिः प. रामानुजाचार्यः

# कौथुमशाखा

- सामगाचार्यास्त्रयोदश, राणायनिः सात्यमुग्रिः दुर्वासाः भागुरिः गौरुण्डिः गौल्गुलविः, औपमन्यवः दारालः, गार्गिसावर्णिः, वर्षगण्यः, कुथुमिः, शालिहोत्रः, जैमिनिः इति चरणव्यूहनिर्दिष्टाः॥
- कुथुमिना दृष्टत्वात् कौथुमशाखा । भारतदेशे प्रायशः कौथुमशाखाया एव लक्षणाध्येतृभिः श्रौतप्रयोगविद्भिः स्मार्तानुष्ठाननिष्ठैश्च परिपाल्यमानत्वात् प्राचुर्याच्च तामेवाधिकृत्य अर्थप्रकाशनं अत्र क्रियते ।
- मन्त्रब्राह्मणयोर्वेदनामधेयमिति आपस्तम्बमहर्षिरसूत्रयत् । अतः प्रतिशाखं मन्त्रः ब्राह्मणं च विद्यते । कौथुमशाखायाम् एवम् ।





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org ✉: pivstrust@gmail.com

# कौथुमशाखा - मन्त्रभागः

- पूर्वार्चिकम्, उत्तरार्चिकम् - अनयोः पदपाठः, स्तोभ पदपाठः, गानं च द्विविधम् - प्रकृतिः ऊहः इति । प्रकृतिश्च द्विविधा, ग्रामे गेयं अरण्ये गेयमिति । ग्रामे गेयस्य ऊहः ऊहगानं अरण्ये गेयस्य ऊहः रहस्यगानमिति संज्ञा, विभागान्तरमपि, प्रकृतिश्च सप्तगानात्मिका । ऊहस्सप्ततन्त्रात्मक इति ।
- गायत्रं प्रथमं गानमाग्नेयं तु द्वितीयकम् ।
  तृतीयमैन्द्रं गानं स्यात्पावमानं चतुर्थकम् ॥
  अर्कद्वंद्वव्रतं चेति त्रीणि पर्वाणि पंचमम् ।
  षष्ठं च शुक्रियं गानं महानाम्नी च सप्तमम् ।
  एतानि सप्त गानानि प्रकृतेः कथितानि वै ॥ इति सर्वानुक्रमणिका,
- एवं सप्त गानानि निर्दिष्टानि प्रकृतिभागस्य ।
- अत्र केचन आग्नेयैन्द्रपावमानारण्यकशुक्रियोहरहस्यमन्त्रभागभेदेन साप्तविध्यं वर्णयन्ति ।





# कौथुमशाखा - मन्त्र, ब्राह्मणभागः

- अपिच सर्वानुक्रमण्यामेव
  सप्त गानानि वै साम्नां ब्राह्मणा अष्ट वै स्मृताः ।
  दशसूत्राणि सप्तापि दशलक्षणमुच्यते ॥
  इति मूलग्रन्था निर्दिष्टाः ।
- ऊहस्सप्ततन्त्रात्मक इत्युक्तम् । तन्त्राणि चैवं विभक्तानि । दशरात्रम्-संवत्सरः-ऐकाहः-अहीनः-सत्रम्-प्रायश्चित्तम्-क्षुद्रः इति । एष मन्त्रभागः ।
- ब्राह्मणभागश्चाष्टधा विभक्तः ।
  अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमम् ।
  षड्विंशाख्यं द्वितीयं स्यात् ततस्सामविधिर्भवेत् ॥
  आर्षेयं देवताध्यायो भवेदुपनिषत्ततः ।
  संहितोपनिषद्वंशो ग्रन्था अष्टावितीरिताः ॥ इति ॥
- मन्त्रभागश्च परिपाल्यतेऽध्येतृभिरिदानीम् । ब्राह्मणभागस्तु क्वचिदेव विलसति अध्येतृपुरुषवैरल्यात् ।

# कौथुमशाखा – आर्चिकभागः

| प्रपाठक | खण्ड | ऋचः |
|---|---|---|
| 1 | 10 | 96 |
| 2 | 10 | 97 |
| 3 | 10 | 99 |
| 4 | 10 | 98 |
| 5 | 10 | 96 |
| 6 | 9 | 99 |
| 7 | 6 | 65 |

आहत्य ऋचः 650

- पूर्वार्चिकम् - ग्रामे गेयारण्ये गेयसाम्नां आधारभूता ऋचः पूर्वार्चिकसंज्ञया व्यवह्रियन्ते । तस्य छन्दआर्चिकमित्यपि संज्ञा भवति । तत्र प्रपाठकास्सप्त सन्ति । एकैकस्मिन् प्रपाठके दश खण्डास्सन्ति । खण्डानां दशतिरित्यपि संज्ञा भवति । सप्तमे प्रपाठके षड्खण्डा एव सन्ति । अत्र विद्यमाना ऋचः पंचाशदुत्तरषट्छतसङ्ख्याकाः ।

# कौथुमशाखा - आर्चिकभागः

- उत्तरार्चिकम् - उतरार्चिके नव प्रपाठकास्सन्ति । अर्धप्रपाठकस्य अध्याय इत्यपि संज्ञा । क्वचित्प्रपाठके अध्यायत्रयमपि विद्यते ।
- स्वरबाहुल्यविशिष्टस्य गानस्य सामेति नाम, तत्र गानभागस्य रथन्तरं, बृहत्, वामदेव्यमिति संज्ञा ।





# कौथुमशाखा - आर्चिकभागः

| | गानम् | सामसङ्ख्या | | गानम् | सामसङ्ख्या |
|---|---|---|---|---|---|
| 1 | गायत्रम् | 1 | 4 | पावमानम् | 384 |
| 2 | आग्नेयम् | 180 | 5 | अर्कपर्व | 89 |
| 3 | ऐन्द्रम् बहुसामि | 132 | | द्वन्द्वपर्व | 77 |
| | ऐन्द्रम् एकसामि | 64 | | व्रतपर्व | 84 |
| | ऐन्द्रम् बृहती | 150 | 6 | शुक्रियपर्व | 40 |
| | ऐन्द्रम् त्रिष्टुप् | 49 | 7 | महानाम्नी | 4 |
| | ऐन्द्रम् अनुष्टुप् | 76 | | | |
| | ऐन्द्रम् इन्द्रपुच्छम् | 162 | | **आहत्य सामानि** | **1492** |

# अथर्ववेदस्य न पृथग्लक्षणम्

अथर्ववेदस्य लक्षणं मीमांसाशास्त्रेऽन्यत्र यत्र कुत्रापि वा न पृथङ्निर्दिष्टम् । अतः पारिशेष्यात् तत्र गीत्याद्यभावात् ऋग्यजुर्लक्षणविशिष्टमन्त्राणां दर्शनात्, सोऽयमथर्ववेदः ऋग्यजूरूपोभयात्मक इति पर्यवस्यति । तत्र तावत् ऋग्वेदे प्रसिद्धा एव ऋचः क्वचित् किञ्चित्पाठभेदेन पठिताः सहस्रशः सन्ति । ताभ्यो भिन्नाश्च ऋचः सहस्रशो विद्यन्ते 'शं नो देवीरभिष्टये, (ऋ. 10-9-4; वा.य. 36-12, अथर्व. 1-6-1), अम्बयो यन्त्यध्वभिः, (ऋ. 1-23-16; अथर्व.1-4-1) अस्य वामस्य पलितस्य होतुः (ऋ. 1-164-1; अथर्व. 9-9-1) इति एवमाद्या ऋग्वेदस्था एव ऋचः । 'स्वस्तिदा विशां पतिः' (ऋ. 10-152-2; अथर्व. 1-21-1), आ त्वा हार्षमन्तरभूः (ऋ. 10-173-1; अर्थव. 6-87-1), तिस्रो मातॄः....विश्वविदो वाचमविश्वविन्नाम्' (ऋ. 1-164-10; अथर्व. 9-9-10) इति पाठभेदविशिष्टाः 'अत्र विशस्पतिः, अन्तरेधि, विश्वविदं, वाचमविश्वमिन्वाम्' इति ऋक् पाठः । एवं ऋग्वेदस्थानि कानिचिद् बहूनि सूक्तानि विद्यन्ते ।

# अथर्ववेदस्य न पृथग्लक्षणम्

- 'ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।' (अथर्व. 1-1-1) 'यस्मादृचो अपातक्षन्' (अथर्व. 10-7-20) 'इन्द्रस्य प्रथमो रथः ।' (अथर्व. 10-4-1) इत्येवमाद्या ऋग्वेदे अप्रसिद्धा ऋच एव । एवं कानिचिद्यजूꣳष्यपि दृश्यन्ते - 'विराड्वा इदमग्र आसीत्' (अथर्व. 8-10-1) 'यो विद्यात् ब्रह्म प्रत्यक्षम्' (अथर्व. 9-6-1) 'तस्यौदनस्य बृहस्पतिः शिरः' (अथर्व. 11-3-1) 'व्रात्य आसीदीयमान एव' (अथर्व. 15-1-1) 'जितमस्माकमुद्भिन्नम्' (अथर्व. 16-8-1) त एते मन्त्राः यजूरूपा एव यथायथं निर्दिष्टैः छन्दोभिर्विशिष्टाः ।

- अस्य तुरीयवेदस्य अथर्ववेदसंज्ञा तु अथर्वणा ऋषिणा सङ्गृहीतत्वात्, भृग्वङ्गिरसाम् अथर्वाङ्गिरसां च आथर्वणानामृषीणां मन्त्रबाहुल्यादपि वा सिद्धा । एवं वेदानां चतुष्ट्वेऽसिद्धेऽपि मन्त्रराशेः 'ऋग्यजु'रिति द्विधैव भेदो वस्तुतत्वसिद्धः । तस्मात् ऋगादिलक्षणप्रयुक्तमेव 'ऋग्यजुःसाम्नां' स्वरूपमिति सिद्धम् ।

- तदुक्तम् - 'ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः । लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥' इति ।

- तस्मात् ऋग्यजुःसामशब्दाः ऋगादिलक्षणोपहितान् ऋगादिमन्त्रानेव स्पृशन्ति । न तु ऋगादिवेदेषु प्रसिद्धं संहिताग्रन्थमात्रं, नापि ब्राह्मणवाक्यं ब्राह्मणादिग्रन्थं वा इति सर्वथा सम्पद्यते । "अहे बुध्निय मन्त्रं मे गोपाय । ऋचः सामानि यजूꣳषि ।" (तै.ब्रा. 1-1-10-3,5; 1-2-1-26) इति स्पष्टतरमाम्नानात् ।





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org
: pivstrust@gmail.com

# अथर्ववेदस्य व्याख्यानावश्यकता - तत्र पूर्वपक्षः

ननु 'यज्ञं व्याख्यास्यामः । स त्रिभिर्वेदैर्विधीयते' (सत्या.सू. १.१) इति स्मरणाद् ऋग्यजुःसाम्नामेव **फलवत्कर्मशेषत्वम्** अवसीयते ।

**प्रादुर्भावोऽपि** त्रयाणामेव श्रूयते । 'त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्' इति (ऐ.ब्रा. ५.३२) । 'ऋचः सामानि जज्ञिरे । यजुस्तस्माद् अजायत' इति (ऋ. १०.९०.९) च ॥

**संख्यानियमश्च** श्रूयते । 'वेदैरशून्यस्त्रिभिरेति सूर्यः' (तै.ब्रा. ३.१२.९.१) । 'यम् ऋषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषि' इति (तै.ब्रा. १.२.१.२६) ॥

**धर्मविशेषश्रवणाच्च** त्रित्वम् अवगम्यते । 'उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्ना' इति (सत्या.सू. १.१.१) । 'यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं (तद्) यद् ऋचा तद् दृढम्' इति (तै.सं. ६.५.१०.३) ॥

ते च ऋगादयो विस्तरेण व्याख्याताः । अस्य तु वेदस्य त्रयीव्यतिरिक्तत्वेन कर्मशेषत्वाभावाद् न व्याख्यानार्हता । अथोच्येत । ऋग्वेदेन हौत्रमेव प्रतिपाद्यते यजुषा आध्वर्यवं साम्ना औद्गात्रम् इति वेदत्रयस्य प्रतिनियतप्रयोगप्रतिपादनपरत्वात् अवशिष्टब्रह्मकर्तव्यताप्रतिपादकश्चतुर्थो वेदो व्याख्येयः । तदभावे यज्ञशरीरस्य अनिष्पत्तेरिति ॥

मैवम् । उक्तैरेव त्रिभिर्वेदैः ऋत्वपेक्षितस्य ब्रह्मकर्तव्यस्यापि सिद्धेः । तथा च ऐतरेयब्राह्मणे । 'यद् ऋचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवति अथ केन ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयात्' इति (ऐ.ब्रा. ५.३३) । स्मर्यते च । 'ऋग्वेदेन होता करोति सामवेदेनोद्गाता यजुर्वेदेनाध्वर्युः सर्वैर्ब्रह्मा' इति । अतश्चतुर्णां होत्रादीनाम् ऋत्विजाम् अपेक्षितस्य क्रियाकलापस्य त्रय्यैव सिद्धत्वात् न चतुर्थस्य वेदस्याकाङ्क्षास्ति कुतस्तस्य व्याख्यानचिन्तेति ॥

वेदवारिधिः प. रामानुजाचार्यः







# अथर्ववेदस्य व्याख्यानावश्यकता - सिद्धान्तः

अत्रोच्यते । हौत्रम् आध्वर्यवम् औद्गात्रमिति समाख्यया त्रयाणामपि वेदानां प्रतिनियतहोत्रादिकर्तव्यप्रतिपादनपरत्वावगमात् न ब्रह्मकर्तव्यप्रतिपादने तात्पर्यं संभवति । यथा अन्यपरस्य यजुर्वेदस्य होतृकर्तव्यतायां यथा वा तथाविधस्य ऋग्वेदस्य अग्निहोत्रे । एवं त्रय्यां तत्रतत्र प्रतिपादितं यद् ब्रह्मत्वम् तद् अथर्ववेदसिद्धमेव लेशेनोक्तम् इति अतात्पर्यविषयत्वात् अकृत्स्नत्वाच्च नादरणीयम् । अकृत्स्नत्वमेव अभिप्रेत्य शाखान्तरोक्तं हौत्रं नानुष्ठेयम् इति आश्वलायनेनोक्तम् । 'तद्ये केचन छान्दोग्ये वाध्वर्यवे वा हौत्रामर्शाः समाम्नाता न तान् कुर्याद् अकृत्स्नत्वाद्धौत्रस्य' इति (आश्व. ८.१३) ॥

अत एव वाङ्मनसनिर्वर्त्यस्य यज्ञशरीरस्य अर्धमेव त्रिभिर्वेदैर्निष्पाद्यते । अर्धान्तरं तु अथर्ववेदेनैवेति श्रूयते । 'प्रजापतिर्यज्ञम् अतनुत । स ऋचैव हौत्रम् अकरोद् । यजुषाध्वर्यवं साम्नौद्गात्रम् अथर्वाङ्गिरोभिर्ब्रह्मत्वम्' इति प्रक्रम्य 'स वा एष त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः संस्क्रियते । मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति' इति (गो.ब्रा. ३.२) । ऐतरेयब्राह्मणेऽपि त्रयीनिष्पाद्य एकः पक्षः मनोनिष्पाद्यः परः पक्ष इति श्रुतम् । 'अयं वै यज्ञो योयं पवते । तस्य वाक् च मनश्च वर्तन्यौ । वाचा च हि मनसा च यज्ञोऽवर्तत । इयं वै वाग् । अदो मनः । तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति । मनसैव ब्रह्मा संस्करोति' इति (ऐ.ब्रा. ५.३३) ॥

एतदेवाभिप्रेत्य गोपथब्राह्मणे पूर्वभागे प्रश्नपूर्वकम् अथर्वविद एव ब्रह्मत्वम् आम्नातम् । 'अथ (ह) प्रजापतिः सोमेन यक्ष्यमाणो वेदान् उवाच । कं वो होतारं वृणीयाम् । कम् अध्वर्युम् । कम् उद्गातारम् । कं ब्रह्माणम् इति । त ऊचुः । ऋग्विदमेव होतारं वृणीष्व । यजुर्विदम् अध्वर्युम् । सामविदम् उद्गातारम् । अथर्वाङ्गिरोविदं ब्रह्माणम् । तथा हास्य यज्ञः चतुष्पात् प्रतितिष्ठति' इति (गो.ब्रा. २.२४) ॥

तत्रैव विपक्षबाधश्च श्रुतः । 'अथ चेद् नैवंविदं ब्रह्माणं वृणुते दक्षिणत एवैषां यज्ञो रिच्यते' इति (गो.ब्रा. २.२४) । 'यथैकपात् पुरुषो यन् अनुभयचक्रो वा रथो वर्तमानो भ्रेषं न्येति एवमेवास्य यज्ञो भ्रेषं न्येति' इति (गो.ब्रा. ३.२) च ॥

# अथर्ववेदस्य व्याख्यानावश्यकता - सिद्धान्तः

'स त्रिभिर्वेदैर्विधीयते' इति स्मृतिस्तु उदाहृतश्रुत्यनुसारेण मुख्यस्य अथर्वविदोऽसंभवे तत्तच्छाखासु यावदुक्तब्रह्मत्वमात्रेणापि क्रतुशरीरनिष्पत्तिर्भवति इत्येवमभिप्राया ॥

'त्रय्या विद्ययेति ब्रूयात्' इति (ऐ.ब्रा. ५.३३) श्रुतिरपि प्रकृतव्याहृतित्रयापेक्षत्वाद् अविरुद्धा । 'अस्य महतो भूतस्य निश्वसितम् एतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरसः' इति (बृ.आ. ४.४.१०) वाजसनेयकश्रुत्यनुसारेण त्रयाणाम् उत्पत्तिश्रुतिः उपलक्षणतया व्याख्येया ॥

'वेदैरशून्यस्त्रिभिरेति सूर्यः' इति च श्रुतिः 'ऋग्भिः पूर्वाह्णे' (तै.ब्रा. ३.१२.९.१) इति प्रकृतकालत्रयाभिप्रायेण । वेदानां चतुष्ट्वस्य सर्वत्र श्रुतत्वात् । तथा चाग्रे तापनीयोपनिषदि आम्नास्यते । 'ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः' इति (नृ.पू.ता. १) । मुण्डके च 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोथर्ववेदः' इति (मु. १.१)॥

'यम् ऋषयस्त्रैविदा विदुः । ऋचः सामानि यजूंषि' इति (तै.ब्रा. १.२.१.२६) त्रैविध्यं तु वेदगतमन्त्राभिप्रायम् । तद् उक्तं जैमिनिना । 'तच्चोदकेषु मन्त्राख्या' (जै. २.१.३२) । 'तेषाम् ऋग् यत्रार्थवशेन पादव्यवस्था' (जै. २.१.३५) । 'गीतिषु सामाख्या' (जै. २.१.३६) । 'शेषे यजुःशब्दः' (जै. २.१.३७) इति । तद् अस्मिन्नपि वेदे विद्यत इति न चतुष्ट्वव्याकोपः ॥

उच्चैष्ट्वादिधर्मनियमोऽपि अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेद इत्युपक्रमवाक्यगतवेदत्रयापेक्ष इति न विरोधः ॥

तस्माद् अपौरुषेयत्वाद् नित्यत्वाद् विवक्षितार्थत्वाच्च कृत्स्नस्यापि वेदराशेस्तदन्तर्गतस्य ब्रह्मवेदस्यापि विवक्षितार्थत्वेन व्याख्येयतासिद्धिः ॥

# अथर्ववेदस्य चतुर्थवेदता

तथापि कथमस्य अन्ते व्याख्येयता? वेदानां क्रमेण अभिव्यक्तिप्रतिपादकश्रुतिवशादिति ब्रूमः ॥

सा च अथर्ववेदस्य पूर्वब्राह्मणे प्रणवप्रशंसावसरे श्रूयते । 'ब्रह्म ह वै ब्रह्माणं पुष्करे ससृजे । स खलु ब्रह्मा सृष्टश्चिन्ताम् आपेदे । केनाहम् एकेनाक्षरेण सर्वांश्च कामान् सर्वांश्च लोकान् सर्वांश्च देवान् सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान् सर्वाश्च वृष्टीः सर्वाणि च भूतानि स्थावरजङ्गमान्यनुभवेयम् इति । स ब्रह्मचर्यम् अचरत् । स ओम् इत्येतद् अक्षरम् अपश्यत् त्रिवर्णं चतुर्मात्रं सर्वव्यापि' इत्यादि (गो.ब्रा. १.१६) ॥

'तस्य प्रथमया स्वरमात्रया पृथिवीम् अग्निम् ओषधिवनस्पतीन् ऋग्वेदं भूरिति व्याहृतिं गायत्रं छन्दः त्रिवृतं स्तोमं प्राचीं दिशं वसन्तम् ऋतुम्' (गो.ब्रा. १.१७) इत्यादिना आद्याभिस्तिसृभिः प्रणवमात्राभिराप्तव्यान् ऋगादीन् प्रतिपाद्य अन्ते समाम्नातम् । 'तस्य मकारमात्रयापश्चन्द्रमसम् अथर्ववेदं नक्षत्राण्यो३मिति स्वम् आत्मानम् आनुष्टुभं छन्दः एकविंशं स्तोमम्' इत्यादि (गो.ब्रा. १.२०) ।

तथा तैत्तिरीयकेऽपि ब्रह्मयज्ञप्रकरणे श्रूयते । 'यद् ऋचोऽधीते पयसः कूल्या अस्य पितॄन् स्वधा अभिवहन्ति । यद् यजूंषि घृतस्य कूल्याः । यत् सामानि सोम एभ्यः पवते । यद् अथर्वाङ्गिरसो मधोः कूल्याः' इति (तै.आ. २.१०) ।

तद् एवम् उदीरितरीत्या सर्वत्राथर्ववेदस्य चरमभावित्वात् तद्व्याख्यानस्य त्रयीव्याख्यानानन्तर्यम् उपपन्नम् ॥

# वेदाः - त्रयी चतुष्टयी वा?

यत्तु कैश्चिदुच्यते - वेदसमवायस्य 'त्रयी' इति नाम, त्रयाणाम् ऋग्यजुःसाम्नामेव बोधकं भवति, अतस्त्रयीसंज्ञकेषु वेदेष्वथर्ववेदस्य सङ्ग्रहो न भवितुं योग्य इति, तदसमञ्जसमेव प्रतिभाति, त्रयीतिसंज्ञाया वेदगतमन्त्रत्रैविध्यनिदानत्वात् । ऋग्वेदेऽप्यथर्वणो वर्णनात् । तथाहि - 'चत्वारि शृङ्गा त्रयो अस्य पादाः । (ऋ. ४.५८.६) इत्यत्र 'चत्वारि शृङ्गाश्चत्वारो वेदा एव चत्वारि शृङ्गाणि'- इत्याबभाषे भगवान् पतञ्जलिः । यास्कोऽपि 'वेदा वा एते उक्ताः ।' (निरु. परि. १.७) इति निरवोचत् । एवमन्यत्रापि - 'ऋचां त्वः पोषमास्ते ... गायत्रं त्वो गायति ... ब्रह्मा त्वो वदति.... (ऋ. १०.७१.११) यज्ञैरथर्वा प्रथमः पथस्तते । (ऋ. १.८३.५) इत्यादिषु ऋङ्मन्त्रेषु अथर्ववित्कर्तृकार्त्विज्यकर्तृत्वविशिष्टस्य ब्रह्मणोऽथर्वणस्य समादरेणोत्कीर्तनं दृश्यते, उपवर्ण्यते च ऋग्वेदेऽथर्वण इदंप्रथमतया निर्मथ्याग्निनिर्माणपूर्वकं यज्ञपथप्रथनमिति दर्शितमेव पुरस्तात् ।

एतेन पुराथर्ववेदस्य यज्ञे समवायो नासीदित्याधुनिकानामनुमानमपि पराहतम् ।





# अथर्ववेदे काण्डानुसारेण मन्त्रसङ्ख्या

| काण्डम् | प्रपाठकः | सूक्तानि | मन्त्राः | काण्डम् | प्रपाठकः | सूक्तानि | मन्त्राः |
|---|---|---|---|---|---|---|---|
| 1 | 1 | 16 | 74 | 5 | 12 | 16 | 222 |
| 1 | 2 | 19 | 79 | 6 | 13 | 51 | 158 |
| 2 | 3 | 17 | 99 | 6 | 14 | 51 | 157 |
| 2 | 4 | 19 | 108 | 6 | 15 | 40 | 139 |
| 3 | 5 | 15 | 111 | 7 | 16 | 59 | 136 |
| 3 | 6 | 16 | 119 | 7 | 17 | 59 | 150 |
| 4 | 7 | 20 | 169 | 8 | 18 | 5 | 122 |
| 4 | 8 | 10 | 71 | 8 | 19 | 5 | 171 |
| 4 | 9 | 10 | 84 | 9 | 20 | 5 | 142 |
| 5 | 10 | 7 | 72 | 9 | 21 | 5 | 171 |
| 5 | 11 | 8 | 82 | 10 | 22 | 5 | 166 |

# अथर्ववेदे काण्डानुसारेण मन्त्रसङ्ख्या

| काण्डम् | प्रपाठकः | सूक्तानि | मन्त्राः | काण्डम् | प्रपाठकः | सूक्तानि | मन्त्राः |
|---|---|---|---|---|---|---|---|
| 10 | 23 | 5 | 184 | 18 | 34 | 2 | 162 |
| 11 | 24 | 5 | 176 | 19 | 35 | 72 | 453 |
| 11 | 25 | 4 | 137 | 20 | 36 | 143 | 958 |
| 12 | 26 | 3 | 148 | | | | |
| 12 | 27 | 2 | 156 | **20** | **36** | **730** | **5987** |
| 13 | 28 | 4 | 188 | | | | |
| 14 | 29 | 2 | 139 | | | | |
| 15 | 30 | 18 | 230 | | | | |
| 16 | 31 | 9 | 103 | | | | |
| 17 | 32 | 1 | 30 | | | | |
| 18 | 33 | 2 | 121 | | | | |

वेदवारिधिः प. रामानुजाचार्यः

# अथर्ववेदसंहिताविषयसूची

1. अध्यात्मप्रकरणम्
   1. ब्रह्मचर्यप्रकरणम्
   2. गृहस्थप्रकरणम्
   3. वानप्रस्थ-सन्यासप्रकरणम्
   4. आयुर्वेदप्रकरणम्
      1. आयुर्वर्धनम्
      2. विविधौषधि-भैषज्यादि
      3. रोगादिनिवारणम्
      4. क्रिमिनाशनम्
      5. विषनाशनम्
      6. अरिष्टनाशनम्
2. अधिभूतप्रकरणम्
   1. राज्यशासनम्/विजयसाधनम्
   2. राजराष्ट्रशासनम्
   3. सङ्ग्रामादिकम्
   4. शत्रुनाशनम्
   5. मणिधारणम्
   6. पापादिनाशनम्
   7. अन्नादिकम्
   8. सुखसम्पत्प्राप्तिः
3. अधिदैवतप्रकरणम्
   1. खिलानि
   2. यज्ञादिकम्
   3. कालः
   4. पश्वादिकम्
   5. वैश्यव्यवसायः

वेदवारिधिः प. रामानुजाचार्यः




pivstrust.org ✉: pivstrust@gmail.com

# अथर्ववेदनाम, शाखासूची

अथर्ववेदनामानि -


1. अथर्ववेदः
2. ब्रह्मवेदः
3. अङ्गिरोवेदः
4. अथर्वाङ्गिरसां वेदः
5. भृग्वङ्गिरसां वेदः
6. क्षत्रवेदः
7. भैषज्यवेदः

अथर्ववेदशाखाः (9)

1. पैप्पलादाः (पिप्पलाः)
2. तौदाः (तोत्तायनाः)
3. मौदाः (दामोदाः)
4. शौनकीयाः (शौनकाः)
5. जाजलाः (जाबालाः)
6. जलदाः (कुनखी)
7. ब्रह्मवदाः (ब्रह्मपलाशाः)
8. देवदर्शाः (देवदर्शी)
9. चारणा वैद्याश्च (चारणविद्या)

# अथर्ववेदीयशाखाः

विष्णुपुराणे (3.6.9-13)




वेदवारिधिः प. रामानुजाचार्यः





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org ✉: pivstrust@gmail.com

# अथर्ववेदवैभवम्

- ऋचो यजूँषि सामानि । अथर्वाङ्गिरसश्च ये ॥, शौनक, पैप्पलादशाखाः
- अथर्वणामङ्गिरसां प्रतीची, (सर्वँ हेदं – मूर्ति, गति, तेजांसि - ब्रह्मणा हैव सृष्टम्)
- ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु । **ब्रह्मा त्वो वदति जातविद्यां** यज्ञस्य मात्रां विमिमीत उ त्वः ॥
- राजाभिषेक, शान्तिक, पौष्टिक, शरीरशास्त्र, आभिचारिकादि कर्माणि प्रतिपाद्यन्ते
- राजपुरोहितानाम् अथर्ववेदज्ञानमनिवार्यम्
- ७३१ सूक्तानि, २० काण्डानि १२००० मन्त्राः
- मेधाजनन, रोगोपशमन, मूत्रमोचन, अपां भेषज, यातुधाननाशन, विजयप्रार्थना, पाशविमोचन, नारीसुखप्रसूति, यक्ष्मनाशन, विद्युत्, कुलपाकन्या, पुष्टिकर्म, शत्रुबाधन, रुधिरस्रावनिवृत्तये धमनीबन्धन, अलक्ष्मीनाशन, शत्रुनिवारण, हृद्रोग-कामिलानाशन, श्वेतकुष्ठ, ज्वरनाशन, शर्मप्राप्ति, स्वस्त्ययन, रक्षोघ्न, राष्ट्राभिवर्धन, सपत्नक्षयण, दीर्घायुःप्राप्ति, पाशमोचन, महद्ब्रह्म, आपः, मधुविद्या, परमधाम, भुवनपतिसूक्त, आस्रावभेषज .... दुःष्वप्नघ्नम् इत्यादि

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org
: pivstrust@gmail.com

# विनियोगः/प्रतिपाद्यविषयाः

तत्र शौनकीयादिषु चतसृषु शाखासु अनुवाकसूक्तऋगादीनां गोपथब्राह्मणानुसारेण पञ्चभिः सूत्रैर्विनियोगोऽभिहितः ॥ तानि च सूत्राणि - कौशिकम्, वैतानम्, नक्षत्रकल्पः, आङ्गिरस-कल्पः शान्तिकल्पश्चेति । तद् उक्तम् उपवर्षाचार्यैः कल्पसूत्राधिकरणे - 'नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः । तुर्य आङ्गिरसः कल्पः शान्तिकल्पस्तु पञ्चमः ॥' इति ॥

तत्र साकल्येन संहितामन्त्राणां शान्तिकपौष्टिकादिषु कर्मसु विनियोगविधानात् संहिताविधिर्नाम कौशिकं सूत्रम् ॥ तदेव इतरैः सूत्रैरुपजीव्यत्वात् प्रधानं च । एतेषु बहुषु सूत्रेषु अथर्ववेदप्रतिपाद्यानि कर्माणि विप्रकीर्णत्वाद् दुर्बोधानीति सुखावबोधाय तानीह संगृह्यन्ते ॥

1. तत्र तावत् **कौशिकसूत्रे** क्रमेण प्रतिपाद्यान्येतानि कर्माणि ॥
आदौ स्थालीपाकविधानेन दर्शपूर्णमासविधिः । ततो मेधाजननानि । ब्रह्मचारिसांपदानि । ग्रामनगरदुर्गराष्ट्रादिलाभार्थानि । पुत्रपशुधनधान्यप्रजास्त्रीकरितुरगरथान्दोलिकादिसर्वसंपत्सा-धकानि । जनानाम् ऐकमत्यसंपादकानि सांमनस्यानि ॥






# विनियोगः/प्रतिपाद्यविषयाः

ततो **राजकर्माणि** । तानि च शत्रुहस्तित्रासनानि संग्रामजयसाधनानि इषुनिवारणार्थानि खड्गादि-सर्वशस्त्रनिवारणानि परसेनामोहनोद्वेजनस्तम्भनोच्चाटनादीनि स्वसेनोत्साहपरिरक्षणाभयार्थानि संग्रामे जयपराजयपरीक्षार्थानि सेनापत्यादिप्रधानपुरुषजयकर्माणि परसेनासंचरणप्रदेशेषु अभिमन्त्रितपाशासिकशाप्रक्षेपणादीनि जयकामस्य राज्ञो रथस्यारोहणम् अभिमन्त्रितभेरीपटहादि-सर्ववादित्रताडनं सपत्नक्षयकर्माणि शत्रूत्सादितस्य राज्ञः पुनःस्वराष्ट्रप्रवेशकानि राजाभिषेकः ॥

**पापक्षयार्थानि** । निर्ऋतिकर्माणि । चित्राकर्मादीनि । पौष्टिकानि । गोसमृद्धिकर्माणि । लक्ष्मीकराणि । पुष्ट्यर्थमणिबन्धनानि । कृषिपुष्टिकराणि । अनडुत्समृद्धिकराणि । गृहसंपत्कराणि नवशालाकर्मादीनि । वृषोत्सर्जनम् । आग्रहायणीकर्म ॥

**जन्मान्तरकृतपापनिमित्ताचिकित्स्यविविधरोगभैषज्यानि** । तत्र प्रथमं सर्वव्याधिभैषज्यम्, ज्वरातिसारबहुमूत्रादिभैषज्यानि, शस्त्राद्यभिघातजरुधिरप्रवाहनिरोधकानि भूतप्रेतपिशाचापस्मार-ब्रह्मराक्षसबालग्रहादिनिवारणानि । वातपित्तश्लेष्मभैषज्यानि । हृद्रोगकामिलाश्वित्रनिवारणानि । संततज्वरैकाहिकादिविषमज्वरराजयक्ष्मजलोदरनिवारणानि गवाश्वादीनां क्रिमिहराणि कन्दमूलसर्पवृश्चिकस्थावरजङ्गमविषनिवारणानि शिरोक्षिनासिकाकर्णजिह्वाग्रीवादिरोगभैषज्यानि ब्राह्मणाद्याक्रोश-निवारणानि गण्डमालादिविविधरोगभैषज्यानि ॥

# विनियोगः/प्रतिपाद्यविषयाः

**पुत्रादिकामस्त्रीकर्माणि** । सुखप्रसवकर्माणि । गर्भाधानगर्भदृंहणपुंसवनादीनि । सौभाग्यकरणानि । राजादिमन्युनिवारणानि । अभीष्टसिद्ध्यसिद्धिविज्ञानानि । दुर्दिनाशन्यतिवृष्टिनिवारणानि । सभाजय-विवादजयकलहशमनानि स्वेच्छातो नदीप्रवाहकरणानि । वृष्टिकर्माणि । अर्थोत्थापनकर्म । द्यूतजय-कर्म । गोवत्सविरोधनिवारणम् । अश्वशान्तिः । वाणिज्यलाभकर्म । स्त्रियाः पापलक्षणनिवारणम् । वास्तुसंस्कारकर्म । गृहप्रवेशकर्म । कपोतवायसाद्युपहतगृहशान्तिविधिः । दुष्प्रतिग्रहायाज्ययाजनादि-दोषनिवारणम् । दुःस्वप्ननिवारणम् । कुमारस्य पापनक्षत्रजननशान्तिः । ऋणापनोदनम् । दुःशकुन-शान्तिः ॥

**आभिचारिकाणि** । परकृताभिचारनिवारणानि ॥

**स्वस्त्ययनानि** । आयुष्याणि । जातकर्मनामकरणचूडाकरणोपनयनादीनि । एकाग्निसाध्याः काम्या यागाः ब्रह्मौदन-स्वर्गौदनाद्या द्वाविंशतिः सवयज्ञाः ॥

क्रव्याच्छमनम् । आवसथ्याधानम् । विवाहः ॥

**पैतृमेधिकानि** । पिण्डपितृयज्ञः ॥

**मधुपर्कः** ॥

पांसुरुधिरादिवर्षणयक्षराक्षसादिदर्शनभूकम्पधूमकेतुचन्द्रार्कोपप्लवादि**बहुविधोत्पातशान्तयः** ॥

आज्यतन्त्रविधिः । अष्टकाकर्म । इन्द्रमहः । ततोऽध्ययनविधिरिति ॥

pivstrust.org
: pivstrust@gmail.com

# विनियोगः/प्रतिपाद्यविषयाः

2. तथा **वैतानसूत्रे** दर्शपूर्णमासादिषु अयनान्तेषु त्रयीविहितकर्मसु ब्रह्मा ब्राह्मणाच्छंसी आग्नीध्रः पोतेति चतुर्णाम् ऋत्विजां कर्तव्यं प्रतिपाद्यते । तत्र अनुज्ञानुमन्त्रणादीनि ब्रह्मणः । शस्त्रादीनि ब्राह्मणाच्छंसिनः । आग्नीध्रस्य अन्वाहार्यश्रपणप्रस्थितयाज्यादीनि । पोतुः प्रस्थितयाज्यादीनि । इति विभागः ॥

तत्र अयं कर्मक्रमः । प्रथमं दर्शपूर्णमासौ । ततोऽग्न्याधानम् । अग्निहोत्रम् । आग्रयणेष्टिः । चातुर्मास्यानि । वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाणि । पशुयागः । अग्निष्टोमोक्थ्य-षोडश्यतिरात्रात्मकः प्रकृतिभूतश्चतुःसंस्थः सोमयागः । वाजपेयः । अप्तोर्यामः । अग्निचयनम् । सौत्रामणी । मैत्रावरुण्यामिक्षेष्टिः । गवाम् अयनम् । राजसूयः । अश्वमेधः । पुरुषमेधः । सर्वमेधः । बृहस्पतिसवगोसवादय एकाहाः सोमयागाः । व्युष्टिद्विरात्र-प्रकृतयोऽहीनाः । रात्रिसत्त्राणि । सांवत्सरिकाण्ययनानि । दर्शपूर्णमासायनानीति ॥

# विनियोगः/प्रतिपाद्यविषयाः

3. **नक्षत्रकल्पेऽपि** प्रथमं कृत्तिकादिनक्षत्रपूजाहोमादि । ततोऽद्भुतमहाशान्तिः । नैर्ऋतकर्म । अमृताद्या अभयान्तास्त्रिंशन्महाशान्तयो निमित्तभेदेन प्रतिपादिताः । तत्र दिव्यान्तरिक्षभौमेषु उत्पातेषु अमृताख्या महाशान्तिः । गतायुषां पुनर्जीवनाय वैश्वदेवी । अग्निभयनिवृत्तये सर्वकामावाप्तये चाग्नेयी । नक्षत्रग्रहोपसृष्टभयार्तरोगगृहीतानां तच्छान्तये भार्गवी । ब्रह्मवर्चसकामस्य वस्त्रशयनाग्निज्वलने च ब्राह्मी । राज्यश्रीब्रह्मवर्चसकामस्य बार्हस्पत्या । प्रजापश्वन्नलाभाय प्रजाक्षयनिवृत्तये च प्राजापत्या । शुद्धिकामस्य सावित्री । छन्दोब्रह्मवर्चसकामस्य गायत्री । संपत्कामस्य अभिचरतोऽभिचर्यमाणस्य च आङ्गिरसी । विजयबलपुष्टिकामस्य परचक्रोद्वेजनकामस्य च ऐन्द्री । अद्भुतविकारनिवृत्ति(कामस्य) राज्यकामस्य च माहेन्द्री । धनकामस्य धनक्षयनिवृत्तिकामस्य च कौबेरी । विद्यातेजोधनायुष्कामस्य आदित्या । अन्नकामस्य वैष्णवी । भूतिकामवास्तुसंस्कार-कर्मणोर्वास्तोष्पत्या । रोगार्तस्य आपद्ग्रस्तस्य च रौद्री । विजयकामस्य अपराजिता । यमभये याम्या । जलभये वारुणी । वात्याभये वायव्या । कुलक्षयनिवृत्तये संतत्याख्या । वस्त्रक्षयनिवृत्तये त्वाष्ट्री । बालस्य व्याधिनिवृत्तये कौमारी । निर्ऋतिगृहीतस्य नैर्ऋती । बलकामस्य मारुद्गणी । अश्वक्षयनिवृत्तये गान्धर्वी । गजक्षयशान्तये पारावती । भूमिकामस्य पार्थिवी । भयार्तस्य अभयाख्या महाशान्तिः । आसां तन्त्रभूता महाशान्तिश्चेति ॥





# विनियोगः/प्रतिपाद्यविषयाः

4. तथा **आङ्गिरसकल्पे** आभिचारकर्मादौ कर्तृकारयितृसदस्यानां स्वात्मरक्षाकरणम् । अभिचारोपयुक्तदेश-कालमण्डपकर्तृकारयितृदीक्षादिधर्मसमिदाज्यादिसंभारनिरूपणादिकम् । ततः आभिचारिककर्माणि । परकृताभिचारनिवारणादीन्यन्यान्यपि कर्माणि ॥

5. **शान्तिकल्पेऽपि** प्रथमं वैनायकग्रहगृहीतलक्षणानि । तच्छान्तये संभाराहरणम् । अभिषेक-वैनायकहोमाः । तत्पूजाविधानम् । आदित्यादिनवग्रहयज्ञादिकमिति ॥

एतेषु कल्पेष्वनुक्तानि यानि राजाभिषेकोपयुक्तद्रव्यप्रकृतिद्रव्यपरिग्रहपुरोहितवरणादीनि **परिशिष्टोक्तानि** तान्यपि अनुक्रम्यन्ते । प्रथमं राजाभिषेकः । प्रातःप्रातर्वस्त्रगन्धालंकारसिंहासनाश्व-गजान्दोलिकाखड्गध्वजच्छत्रचामरादीनां तत्तन्मन्त्राभिमन्त्रितानां राज्ञे प्रदानादीनि पुरोहितकर्माणि । सुवर्णधेनुतिलभूमिदानादीनि राज्ञः प्रतिदिवसकर्तव्यानि । पूजितपिष्टमय्या सदीपया रात्रिप्रतिमया राज्ञो नीराजनम् । रक्षाकरणं च इत्येवमादीनि पुरोहितस्य रात्रिकर्माणि । राज्ञः पुष्पाभिषेकः । राज्ञो रात्रौ आरात्रिकविधानम् । प्रातःप्रातर्घृतावेक्षणम् । कपिलादानम् । तिलधेनुदानम् । रसादिधेनवः । कृष्णाजिनदानम् । भूमिदानम् । तुलापुरुषविधिः । आदित्यमण्डलाकारापूपदानम् । हिरण्यगर्भविधिः । हस्तिरथदानम् । कनकाश्वादिदश-महादानानि । अश्वरथदानम् । गोसहस्रविधिः । वृषोत्सर्गः । कोटिहोमः । लक्षहोमः । अयुतहोमः । घृतकम्बलविधिः । तटाकप्रतिष्ठा । पाशुपतव्रतम् । इत्येवमादीनि ॥ अन्यान्यपि दानव्रतादीनि ॥

इति सपरिशिष्टपञ्चकल्पप्रतिपाद्यानां कर्मणां दिङ्मात्रेण अयम् अनुक्रमः ।

वेदवारिधिः प. रामानुजाचार्यः

# विनियोगः/प्रतिपाद्यविषयाः

एतानि च त्रिविधानि **नित्यनैमित्तिककाम्यभेदेन** । तत्र जातकर्मादीनि **नित्यानि** । दुर्दिनाशनिनिवारणाश्व-शान्त्यद्भुतकर्माणि च **नैमित्तिकानि** । मेधाजननग्रामसांपदादीनि **काम्यानि** ॥ अत्र नित्यानां नैमित्तिकानां च अवश्यानुष्ठेयता । अकरणे प्रत्यवायस्मरणात् । तथा हि - 'नित्यनैमित्तिके कुर्यात् प्रत्यवायजिघांसया ।' इति ॥ काम्यानां तु इच्छातः प्रवृत्तिः ॥

एतेषां ग्रामाद् बहिः प्रागुदग्देशे महानदीतटाकाद्युत्तरकूलेऽनुष्ठानम् । 'पुरस्तादुत्तरतोऽरण्ये कर्मणां प्रयोग उत्तरत उदकान्ते' इति कौशिकसूत्रात् (कौ. १.७) ॥

**पुंसवनादीनां** तु नित्यानां गृह एवेति रुद्रभाष्यकारमतम् ॥ कालस्तु पर्वद्वयं पुण्यनक्षत्रयुक्तं तिथ्यन्तरं वा । **अद्भुतकर्मणां** तु तत्तन्निमित्तानन्तरमेव । तथा चोक्तम् - 'अमावास्या पौर्णमासी पुण्यनक्षत्रयुक् तिथिः । एत एव त्रयः कालाः सर्वेषां कर्मणां स्मृताः । अद्भुतानां सदाकालम् आरम्भः सर्वकर्मणाम् ॥' इति ॥

**आभिचारिकाणां** तु ग्रामाद् दक्षिणदिशि कृष्णपक्षे कृत्तिकानक्षत्रे प्रयोग इति विशेषः । तथा च कौशिकं सूत्रम् । 'आभिचारिकेषु दक्षिणतः संभारम् आहृत्य आङ्गिरसम्' इत्यादि (कौ. ६.१) । अत्र आङ्गिरसमिति आङ्गिरसकल्पोक्तमित्यर्थः ।

एतेषां कर्मणां प्राच्योदीच्याङ्गानि दर्शपूर्णमासवत् कार्याणि । 'इमौ दर्शपूर्णमासौ व्याख्यातौ दर्शपूर्णमासाभ्यां पाकयज्ञाः' इति सूत्रकारवचनात् (कौ. १.६) । अत्र **पाकयज्ञशब्देन** सर्वम् आथर्वणं कर्मोच्यते । तच्च द्विविधम् । आज्यतन्त्रं पाकतन्त्रं चेति । यत्र प्रधानं हविः आज्यं तद् **आज्यतन्त्रम्** । यत्र चरुपुरोडाशादिकं तत् **पाकतन्त्रम्** ॥

pivstrust.org : pivstrust@gmail.com

# विनियोगः/प्रतिपाद्यविषयाः

**आज्यतन्त्रे** अयम् अनुष्ठानक्रमः । प्रथमम् 'अव्यसश्च' (१९.६८) इति कर्तुर्जपः बर्हिर्लवनं वेदिः उत्तरवेदिः अभिप्रणयनम् अग्निप्रतिष्ठापनं व्रतग्रहणं पवित्रकरणं पवित्रेणेध्मप्रोक्षणम् इध्मोपसमाधानं बर्हिःप्रोक्षणं ब्रह्मासनं ब्रह्मस्थापनं स्तरणं स्तीर्णप्रोक्षणम् आत्मासनम् उदपात्रस्थापनम् आज्यसंस्कारः स्रुवग्रहणं ग्रहग्रहणं पुरस्ताद्धोमाः आज्यभागौ । 'सविता प्रसवानाम्' (५.२४) इति कर्मणि अभितोऽभ्यातानैराज्यं जुहुयात्' इति (कौ.सू. १४.१) सूत्रकारवचनात् अभ्यातानानि । एतदन्तं **पूर्वतन्त्रम्** ॥

ततो यथोपदेशं **प्रधानहोमः** । तत **उत्तरतन्त्रम्** । अभ्यातानानि पार्वणहोमः समृद्धिहोमाः संनतिहोमाः स्विष्टकृद्धोमः सर्वप्रायश्चितीयहोमः स्कन्नहोमः 'पुनर्मैत्विन्द्रियम्' (७.६९) इति होमः स्कन्नास्मृतिहोमौ संस्थितिहोमाः चतुर्गृहीतहोमः बर्हिर्होमः संस्रावहोमः विष्णुक्रमाः व्रतविसर्जनं दक्षिणादानं ब्रह्मोत्थापनम् इति ॥

**पाकतन्त्रे** तु अभ्यातानाभाव एव विशेषः । अन्यत् सर्वं समानम् । तथा च गोपथब्राह्मणम् - 'आज्यभागान्तं प्राक्तन्त्रम् ऊर्ध्वं स्विष्टकृता सह । हवींषि यज्ञ आवापो यथा तन्त्रस्य तन्तवः ॥' इति ॥

**अद्भुतकर्मणाम्** आज्यतन्त्रत्वेऽपि पाकतन्त्रवद् अभ्यातानाभावः । यद् आह केशवः । 'पाकतन्त्रेष्वभ्यातानानि न भवन्ति अद्भुतेषु न भवन्ति अन्यत्र सर्वत्र भवन्ति' इति (कौ.सू. १४.१) ॥





# अथर्वप्रोक्तानि कर्माणि

अस्याः शौनकीय-संहितायाः गोपथब्राह्मणे कौशिक-वैतान-नाक्षत्र-आङ्गिरस-शान्तिक-कल्पानुसारेणानुवाकसूक्तमन्त्राणां दृश्यते विनियोगो विविधेषु शान्तिकेषु पौष्टिकेषु च कर्मसु । तथा - मेधाजननम् (१.१.१), अध्यात्मम् (१३.१-९), ब्रह्मचर्यसंपादनम् (११.५), ग्रामनगरदुर्गराष्ट्राणां शत्रुतोऽभिरक्षणम् (१२.१), पशुपुत्रधनधान्यप्रजाकरितुरगादिसंपत्साधनम् (२.२६; ३.१०; ३.१४; ३.२३; ५.११), प्रजानामैकमत्यसंपादकं सांमनस्यम् (३.३०; ६.७३), राजकर्म, संग्रामजयसाधकं शत्रुसेना-संमोहनोद्वेजनस्तम्भनोच्चाटनादिकम् (३.१-२, ५.२०-२१), स्वसेनोत्साहाभयरक्षणम् (११.९-११), संग्रामे जयपराजयपरीक्षणम् (४.३१-३२), सेनापत्यादिविजयसाधनम् (५.३), शत्रूत्सादितस्य राज्ञः पुनः स्वराज्यप्रवेशनम् (३.३,४.८), नवशालानिर्माणम् (३.१२; ५.२६; ९.३), विविधभैषज्यनिर्माणम्, कृमिनाशनम्, हृद्रोगकामलश्वित्रादिदोषनिवारणम् (३.१२; ५.२६; ९.३), विवाहगर्भाधानादि-सौभाग्यसंवर्धनम् (२.३०; ५.२५; ६.११; १४.१-२), वाणिज्यलाभसम्पादनम् (३.१५), स्वस्त्ययनम् (६.९३), दीर्घायुष्यसम्पादनम् (२.४; ५.२८) इत्येवमादीनि जनानामैहिकामुष्मिकफलप्राप्तिसाधकानि सन्ति वेदेऽस्मिन् सुबहूनि कर्माणि ।

अथर्ववेदे न केवलं ज्वरादिव्याधीनामपि तु सर्वेषामाधीनामपि निवारणोपायदर्शनात्प्रतीयते यद्वेदोऽय-मशेषस्य मानुषजातस्य परमोपकारकत्वेन वरीवर्तीति ।





# अथर्ववेदसंहिता (पैप्पलादशाखा)

| काण्डम् | सूक्तानि | मन्त्रसंख्या | आहत्य |
|---|---|---|---|
| १ | ११२ | ४८३ | |
| २ | ९१ | ४८५ | ९६८ |
| ३ | ४० | २७८ | १२४६ |
| ४ | ४० | ३०२ | १५४८ |
| ५ | ४० | ३५४ | १९०२ |
| ६ | २३ | २३७ | २१३९ |
| ७ | २० | २११ | २३५० |
| ८ | २० | २३० | २५८० |
| ९ | २९ | ३०४ | २८८४ |
| १० | १६ | १६५ | ३०४९ |

वेदवारिधिः प. रामानुजाचार्यः

# अथर्ववेदसंहिता (पैप्पलादशाखा)

| काण्डम् | सूक्तानि | मन्त्रसंख्या | आहत्य |
|---|---|---|---|
| ११ | १६ | १४८ | ३१९७ |
| १२ | २२ | १९८ | ३३९५ |
| १३ | ९ | ६५ | ३४६० |
| १४ | ९ | ८४ | ३५४४ |
| १५ (१) | २३ (५१०) | २२७ | ३७७१ |
| १६ (२) | १५५ (१५५) | १३६३ (१३६३) | ५१३४ |
| १७ | ५५ | ४९६ | ५६३० |
| १८ (३) | ८२ (१३७) | ६६३ (११५९) | ६२९३ |
| १९ | ५६ | ९११ | ७२०४ |
| २० (४) | ६५ (१२१) | ६३३ (१५४४) | ७८३७ |

आहत्य ९२३ सूक्तानि ७८३७ मन्त्राः

वेदवारिधिः प. रामानुजाचार्यः





# शौनकीय-पिप्पलादशाखानां मन्त्रसङ्ख्यातालिका

| काण्डेषु मन्त्राः (पैप्पलादे) | शौनकीये काण्डेषु मन्त्राः |
|---|---|
| १-५ (११०२) | १-५ (१२९०) |
| ६-१५(१८६९) | X |
| १६ (१३६३) | ८-११(१२६९/२५५९), १२.५-१०; अथच शौनके ६.११४-१२३ (१६.४९-५१), ४.१४.७-९,९.५.२.१९-२४.३१, ३३,३५,३७,३८ (१६.९९) |
| १७ (४९६) | १२.१-४,१०.७(३०४/२८६३=आहत्य १२ अध्यायस्य/संहत संख्या) |
| १८ (६६३) | १३-१८(९६३/३८२६) उभयत्र प्रतिपाद्यविषयसाम्यं, परं गणनाक्रमे भेदः |
| १९ (९११) | ६(४५४/४२८०) |
| २० (६३३) | ७(२८६/४५६६) |
| X | १९(४५३/५०१९) |
| X | २०(९५८/५९७७) |
| सम्पूर्णसंख्या ७८३७ | ५९७७ |

# ब्राह्मणानि

(पू.मी. 2.1.8) अथ ब्राह्मणविषयविचाराः । तल्लक्षणं द्वितीयाध्यायप्रथमपादे विचारितम् - 'नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यतेऽथवा । नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः ॥ मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः । अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणम्' (जै.न्या. 2.1.24,25) इति ॥ चातुर्मास्येष्विदमाम्नायते - 'एतद्ब्राह्मणान्येव पञ्च हवीꣳषि' (तै.ब्रा. 1.7.1.1) इति । तत्र ब्राह्मणस्य लक्षणं नास्ति । कुतः - वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः निराकर्तुमशक्यत्वात्, इति चेन्न । भागद्वयाङ्गीकारेण मन्त्रव्यतिरिक्तो भागो ब्राह्मणमिति लक्षणस्य निर्दोषत्वात्।

ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयोऽपि भागा आम्नायन्ते **'यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीः'** (तै.आ. 2.9) इति । मैवम् । विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात् । 'देवासुराः संयत्ता आसन्' (तै.सं. 1.5.1) इत्यादय **इतिहासाः**। 'इदं वा अग्रे नैव किञ्चनाऽऽसीत्' । 'न द्यौरासीत्' (तै.ब्रा. 2.2.9) इत्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं **पुराणम्** । **कल्प**स्त्वारुणकेतुकचयनप्रकरणे समाम्नायते - 'इति मन्त्राः, कल्पोऽत ऊर्ध्वं, यदि बलिꣳ हरेत्' (तै.आ. 1.31.2) इति । अग्निचयने 'यमगाथाभिः परिगायति' (तै.सं. 5.1.8) इति विहिता मन्त्रविशेषा **गाथाः** । मनुष्यवृत्तान्तप्रतिपादिका ऋचो **नाराशंस्यः** । तस्मात् मन्त्रब्राह्मणव्यतिरिक्तभागाभावाल्लक्षणं सुस्थितम् ।

तच्च ब्राह्मणं द्विविधं विधिरूपमर्थवादरूपं चेति । 'यत्पर्णशाखया वत्सानपाकरोति' (तै.ब्रा. 3.2.1) इति **विधिः** । 'तृतीयस्यामितो दिवि सोम आसीत्' (तै.ब्रा. 3.2.1.1) इत्यादिकोऽ**र्थवादः** ।

# ब्राह्मणविधाः

1. 'यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीः' (तै.आ. 2.9)

| ब्राह्मणवाक्यविधाः | उदाहरणानि | प्रमाणाकरः |
|---|---|---|
| इतिहासाः | 'देवासुराः संयत्ता आसन्' इत्यादयः | (तै.सं. 1.5.1) |
| पुराणम् | 'इदं वा अग्रे नैव किञ्चनाऽऽसीत्' ।<br>'न द्यौरासीत्' | (तै.ब्रा. 2.2.9) |
| कल्पः | 'इति मन्त्राः, कल्पोऽत ऊर्ध्वं, यदि बलिꣳ हरेत्' | (तै.आ. 1.31.2) |
| गाथाः | 'यमगाथाभिः परिगायति' | (तै.सं. 5.1.8) |
| नाराशंस्यः | मनुष्यवृत्तान्तप्रतिपादिका ऋचः | |

2. 'तच्च ब्राह्मणं द्विविधं विधिरूपमर्थवादरूपं चेति ।' (जै.न्या. 2.1.24,25)

| | | |
|---|---|---|
| विधिः | 'यत्पर्णशाखया वत्सानपाकरोति' | (तै.ब्रा. 3.2.1) |
| अर्थवादः | 'तृतीयस्यामितो दिवि सोम आसीत्' | (तै.ब्रा. 3.2.1.1) |

वेदवारिधिः प. रामानुजाचार्यः

# ब्राह्मणानि

- निगदानां मन्त्रत्वं जैमिनिना पुनः विकल्पेन अङ्गीकृतम् । आपस्तम्बमतेन - 'युगपत् कालान् वा निगदान्' (आपश्रौ ८.५.१८) इति तल्लक्षणम् । रुद्रदत्तस्त्वस्मिन् सूत्रे - 'उच्चैः प्रयोगमन्त्राः तावत् संप्रेषादयः' इत्याह । एवं परसंबोधनार्था निगदाः - यथा 'उच्चैः समाहन्तवा, अविदहन्तः श्रपयत, इत्यादयः । अतोऽन्यद् ब्राह्मणम् । तत्र वृत्तिकारः -

- **हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पः व्यवधारणकल्पना ॥ उपमानं दशैते तु विधयो ब्राह्मणस्य तु । एतत् स्यात् सर्ववेदेषु नित्यं हि विधिलक्षणम्" ॥ (जैसू शाभा, तंवा २.१.८) इत्याह ।**
- तत्र **हेतुः** यथा - 'शूर्पेण जुहोति', 'तेन हि अन्नं क्रियते' इति । **निर्वचनं** - 'तदेनमधिनोत् तद् दध्नो दधित्वम्' इति । अत्र हि 'धिवि प्रीणने' (धापा ६३२) इत्यस्मात् भ्वादौ निर्दिष्टात् धातोः दधिशब्दस्य निरुक्तिः । अर्थवादो हि निन्दाप्रशंसाऽन्यपरवाक्यं भवति । तत्र **निन्दा** - 'बर्हिषि रजतं न देयम्', 'सोऽरोदीत् यदरोदीत् तद् रुद्रस्य रुद्रत्वम्' इति । **प्रशंसा** - 'वायुर्वै क्षेपिष्ठा देवता' । अथवा 'यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति' इत्यादि । **संशयः** - 'होतव्यं गार्हपत्ये न होतव्यम्' इति । **विधिः** - 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति । **परक्रिया** नाम उपाख्यानम् । **पुराकल्पः** पुराणकथाः । **व्यवधारणकल्पना** नाम यत्र अन्यथा अर्थः प्रतिभाति तत्र पौर्वापर्यपर्यालोचनया व्यवधार्य अन्य एव अर्थः कल्प्यते, यथा - 'यावन्तो वै सदस्याः ते सर्वे दक्षिण्याः' इति ।

- अत्र पुनः शबरः - 'एतदपि प्रायिकम्' इत्याह । स हि 'इतिकरणबहुलम्', 'इत्याह उपनिबद्धम्', 'आख्यायिकास्वरूपम्' इत्यादीनि ब्राह्मणलक्षणानि अपि प्रसिद्धानि निर्दिदेश ।



पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)
pivstrust.org
✉: pivstrust@gmail.com

**हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परक्रिया पुराकल्पः व्यवधारणकल्पना ॥**
**उपमानं दशैते तु विधयो ब्राह्मणस्य तु ॥ (जैसू शाभा, तंवा २.१.८)**

| | | |
|---|---|---|
| हेतुः | 'शूर्पेण जुहोति', 'तेन हि अन्नं क्रियते' | 'इन्दवो वामुशन्ति हि' |
| निर्वचनं | 'तदेनमधिनोत् तद् दध्नो दधित्वम्' | 'उदानिषुर्महीरिति तस्मादुदकमुच्यते' |
| निन्दा | 'बर्हिषि रजतं न देयम्', 'सोऽरोदीत् यदरोदीत् तद् रुद्रस्य रुद्रत्वम्', 'अमेध्या वै माषाः' | 'मोघमन्नं विन्दते अप्रचेताः' |
| प्रशंसा | 'वायुर्वै क्षेपिष्ठा देवता', 'यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति', | 'अग्निर्मूर्धा दिवः ककुत्' |
| संशयः | 'होतव्यं गार्हपत्ये न होतव्यम्', 'तद्व्यचिकित्सत् । जुहवानी३ मा हौषा३मिति' | 'अधःस्विदासी३ दुपरिस्विदासी३त्' |
| विधिः | 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'यजमानेन संमितौदुम्बरी भवति' | 'वसन्ताय कपिञ्जलानालभते' |
| परक्रिया | 'माषानेव मह्यं पचन्ति' | 'सहस्रमयुता ददत्' |
| पुराकल्पः | 'पुरा ब्राह्मणा अभैषुः' | 'यज्ञेन यज्ञमयजन्त देवाः' |
| व्यवधारणकल्पना | 'यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्क-पालान्निर्वपेत्' | प्रतिगृह्णीयादिति श्रुतं (प्रथमपक्षः) प्रतिग्राहयेदिति कल्पयिष्यते । |
| उपमानम् | 'सोमवल्लीमिव पूतिकामादद्यात्' | 'श्येनेन यजेत', 'अध्वर्युः प्रम्रियते स इव यजमानः' |

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com

# ब्राह्मणानि

- सायणार्येण पुनः ब्राह्मणस्य अष्टविधत्वमुक्तं - यथा - 'वेदो हि मन्त्रब्राह्मणरूपेण द्विविधः । तत्र इयं ब्रह्मवल्ली ब्राह्मणरूपा । ब्राह्मणं च अष्टधा भिन्नम् । इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानानि' इति ।
- यज्ञप्रयोगविवेचने मन्त्रब्राह्मणादीनामुपयोगं दर्शयन् बोधायन आह - 'पञ्चतयेन कल्पमवेक्षेत । छन्दसा दृष्टेन - (प्रत्ययेन न्यायेन संस्थावशेन) इति । छन्दसेति यदवोचाम यथाम्नायप्रणिधि इदं पूर्वम् इदमुत्तरमिति । अथापि मन्त्र एव स्वयं कर्म प्रब्रूते । कर्मानुवादो भवति .... । यच्छन्दसा न शक्नुयात् कल्पयितुं ब्राह्मणेन तच्चिकल्पयिषेत् । ब्राह्मणम् उ हैवैनान् मन्त्रान् प्रज्ञातान् विदधाति इदमनेन करोति इदमनेनेति । यथैतद्भवति 'इषे त्वा ऊर्जे त्वा' इति शाखामाच्छिनत्ति । वायवः स्थोपायव स्थ इति वत्सानपाकरोति इति । अथापि अमन्त्राणि कर्माणि विदधाति । यथैतद्भवति 'अष्टासु प्रक्रमेषु ब्राह्मणोऽग्निम् आदधीत एकादशसु राजन्यः द्वादशसु वैश्यः' (बौश्रौ २४.१) इति ।







# ब्राह्मणानि

- तैत्तिरीयसंहितायाः व्याख्याता भट्टभास्करः पुनराधेयब्राह्मणव्याख्यानावसरे आह - 'तत्र कर्मचोदना ब्राह्मणानि । ब्राह्मणं नाम कर्मणः तन्मन्त्राणां च व्याख्यानग्रन्थः । 'ब्राह्मणशेषोऽर्थवादः निन्दा प्रशंसा परकृतिः पुराकल्पः (आपश्रौ २४.१.३३) इति । ब्राह्मणं च द्विधा - कर्मब्राह्मणं कल्पब्राह्मणं चेति । तत्र कर्मब्राह्मणं यत्केवलानि कर्माणि विधत्ते, मन्त्रान् विनियुक्ते, न प्रशंसति न निन्दति च, यथा 'अनुमत्यै पुरोडाशम् (तैसं १.८.१) इत्यादि सांहितिकम् । अतोऽन्यानि कल्पब्राह्मणानि । यथा इदमेव - 'देवासुराः संयत्ता आसन्' (तैसं १.५.१) इत्यादि । आहुश्च - 'क्वचिद् विधिः प्रशंसा च केषुचिद् विधिरेव च ।', 'विधानं कल्प्यते स्तुत्या निन्दया च निषेधनम् । विधिस्तुत्योः समा वृत्तिः तथा निन्दानिषेधयोः ॥' इति ॥
- तत्र परकृतयः मनुष्यकृतयः यथा 'विश्वरूपो वै त्वाष्ट्रः' (तै.सं. २.६.१) इत्यादयः । पुराकल्पाः प्रजापत्यादिकृतयः । यथा - 'प्रजापतिः प्रजा असृजत' इत्यादयः । सर्वाण्येतानि कल्पब्राह्मणानि । अथ **ब्राह्मणानुब्राह्मणानि** यथा 'अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति' (तै.ब्रा. १.६.१, तै.सं. १.८.१) इत्यादीनि' (तै.सं. १.५.१) ।
- राजसूयभाष्यभूमिकायाम् (तै.सं. १.८.१) अपि ब्राह्मणं सविस्तरं विवृणोति । तथा हि गाथाः इतिहासाः पुराकल्पाश्च ब्राह्मणाण्येव । गाथाः वैदिकाः श्लोकाः अर्थप्रधानाः, न प्रशंसानिन्दापराः, 'स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम्' (तै.आ. 1.2) इत्याद्याः । इतिहासाः परकृतयः मनुष्यकृतयः 'विश्वरूपो वै त्वाष्ट्रः' (तै.सं. २.५.१) इत्येवमादयः । पुराकल्पाः प्रजापत्यादिकृतयः 'प्रजापतिः प्रजा असृजत' (तै.सं. २.१.२) इत्येवमादयः । सर्वाण्येतानि ब्राह्मणानीत्युच्यन्ते।
- एतदुक्तं भवति, 'कर्मचोदना ब्राह्मणम् । तत्त्वविषयमर्थवादाद्भिन्नं कर्मविधानं कल्पं ब्राह्मणमित्युच्यते । अतत्त्वविषयं कल्पब्राह्मणमेवस यथा - 'सावित्रं जुहोति प्रसूत्यै' (तै.सं. १.५.१) इत्यादि' । एवं हि भट्टभास्करमतेन ब्राह्मणं हि कर्मब्राह्मणं कल्पब्राह्मणम् इति भेदेन द्विधा विभक्तम् । ततोऽन्यानि ब्राह्मणानुब्राह्मणानीत्युच्यन्ते इति । एतावता ब्राह्मणेषु आरण्यकोपनिषदामपि अन्तर्भावित्वं द्रष्टव्यम् ।

# ब्राह्मणानि

- ब्राह्मणम्
  - कर्मब्राह्मणम् — यत्केवलानि कर्माणि विधत्ते, मन्त्रान् विनियुक्ते, न प्रशंसति न निन्दति च, यथा 'अनुमत्यै पुरोडाशम्' (तैसं १.८.१) इत्यादि सांहितिकम् ।
  - कल्पब्राह्मणम् — 'देवासुराः संयत्ता आसन्' (तै.सं १.५.१) इत्यादि ।

# ब्राह्मणानि

| | | |
|---|---|---|
| परकृतयः | मनुष्यकृतयः | 'विश्वरूपो वै त्वाष्ट्रः' (तै.सं. २.५.१) इत्यादयः । |
| | | |
| ब्राह्मणानुब्राह्मणानि | | 'अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति' (तै.ब्रा. १.६.१, तै.सं. १.८.१) इत्यादीनि |
| गाथाः | वैदिकाः श्लोकाः अर्थप्रधानाः, न प्रशंसानिन्दापराः | 'स्मृतिः प्रत्यक्षमैतिह्यम् अनुमानश्चतुष्टयम्' (तै.आ. १.२) इत्याद्याः । |
| इतिहासाः | परकृतयः मनुष्यकृतयः | 'विश्वरूपो वै त्वाष्ट्रः' (तै.सं. २.५.१) इत्येवमादयः । |
| पुराकल्पाः | प्रजापत्यादिकृतयः | 'प्रजापतिः प्रजा असृजत' (तै.सं. २.१.२) इत्येवमादयः । |

वेदवारिधिः प. रामानुजाचार्यः

'अस्य महतो भूतस्य निःश्वसितमेतद् यद् (ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः) इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितम्' (बृ.आ. २.४.१०)

| | |
|---|---|
| **इतिहासः** | 'उर्वशी अप्सराः' |
| **पुराणम्** | 'असद्वा इदमग्र आसीत्' |
| **विद्या** | देवयजनविद्या सोयमित्याद्या |
| **उपनिषदः** | 'प्रियमित्येतद् उपासीत' |
| **श्लोकाः** | 'तदेते श्लोकाः' |
| **सूत्राणि** | 'आत्मेत्येवोपासीत' |
| **अनुव्याख्यानानि** | मन्त्रविवरणानि |
| **व्याख्यानानि** | 'आत्मेत्येवोपासीत' |

# पत्रम्

# 2. पाण्डुलिपिपठनम्

वेदवारिधिः प. रामानुजाचार्यः

# षड्विंशतिसूत्रविषये प्रस्तावः

- उपोद्घातः
- मातृकासंग्रहः
- नामनिर्वचनम्
- शोधप्रक्रिया
- आदृतक्रमः (आनुपूर्वी)
- कंप्यूटर् प्रणाळी प्रयोगः
- व्याख्याकृत्यम्
- दृष्टान्ताः
- योहिप्राप्तिः
- दुरूहविषयचर्चा
- कर्तव्यशेषः
- कृतज्ञतानिवेदनम्

वेदवारिधिः प. रामानुजाचार्यः





**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org ✉: pivstrust@gmail.com

# ग्रन्थ,नन्दिनागरी,लिपि-तालपत्र-विषये दृष्टान्ताः

एकस्यैव ग्रन्थस्य मुद्रित, देवनागरीलिप्यां लभ्यस्य ग्रन्थ, नन्दिनागरिलिप्योः लिखितमातृकाभ्यः पठनार्थं सौकर्याय प्रस्तावः गतकक्ष्यायां प्रारब्धः (14-2-24)

तत्र श्रीमद्वाल्मीकिरामायणे सुन्दरकाण्डे अङ्गुलीयकप्रदानसर्गदृष्टान्तः उपयुक्तः ।

वैदिकवाङ्मये तादृशसौकर्याय तैत्तिरीये १. पुरुषसूक्तस्य तथा २. एकाग्निकाण्डभागस्य हरदत्तभाष्यं च स्वीक्रियते । उभयमेतत् अस्मदन्तर्जालस्थाने च लभ्यम् ।

'वेदेषु पौरुषं सूक्तम्' इत्युक्तत्वात् सर्ववेदेषु उपलभ्यमानं सर्ववेदसारभूतं च सर्वोपयोगि ।

एकाग्निकाण्डे विवाह, उपनयनसंस्काराद्युपयुक्तसर्वमन्त्राणां पाठात् तेषामप्युपयोगिता ।

सामान्यतः परम्परयाधीतवतां वैदिकानां शास्त्रज्ञानां च कौशलवर्धनाय 'तार्क्ष्य'नामकप्रकल्पे अस्माभिः एषः अंशः प्रस्तुतः, अस्माकं 'यूट्यूब्' चानल् मध्ये अस्मिन् सङ्केते लभ्यते -

https://www.youtube.com/playlist?list=PLfD6gvwTo3rvcDK-u2GsW4LhSklBk8Utv

वेदवारिधिः प. रामानुजाचार्यः





# एतत्कक्ष्यायां पञ्चीकृतेषु अभ्यासाद्यर्थं वर्गीकरणम्

वेदार्थस्य आधुनिकक्रमेण अध्यापनार्थं प्रवृत्ते शिक्षणकार्यक्रमेऽस्मिन् उपशतं वेदच्छात्राः समवेताः । तेषां सङ्क्षिप्तविवरणमत्र प्रस्तूयते ।

एषु एकैकवेदशाखाध्यायिनः एकगणत्वेन मिलित्वा परस्परं कक्ष्यायां पाठितांशविषये चिन्तन, मननादि कर्तुं व्यवस्थां कर्तुम् अर्हन्ति । एवं सर्वशाखाभ्यः सङ्गृहीताः एकगणे च भवितुमर्हन्ति ।

द्वित्रिगणाः ईदृशक्रमेण कृताश्चेत् अग्रे प्रतिमासं साक्षात् मेलनं, विषयविचार, उपस्थापनादि च कर्तुं सौकर्याय भवेत् ।

पुनश्च पक्षे एकदा कक्ष्यायामेव वा तदनन्तरं वा संस्कृतमाध्यमेन लेखन, प्रवचनाभ्यासाय च अवकाशः कल्पयिष्यते । एतदतिरिच्य परीक्षारूपेण किमपि न भविष्यति । परन्तु सर्वेष्वेतेषु भागग्रहणस्य मूल्यमापनं प्रायः क्रियेत ।

परीक्षा,मौल्यमापन,दृष्ट्वा षट् पत्ररूपेण पठ्यविषयस्य उपस्थाप्यमानत्वात् सर्वेष्वपि एकैकोऽपि स्वस्तरज्ञानाय अभिवर्धनाय च आगामिसप्ताहे बुधवासरकक्ष्यातः एवं सक्रियं भागं गृह्णातु इति निरीक्षा अस्माकम् ॥

वेदवारिधिः प. रामानुजाचार्यः

| Vedawise | Count |
|---|---|
| Atharvaveda | 5 |
| Krishna Yajurveda | 56 |
| Rigveda | 13 |
| Samaveda | 10 |
| Shukla Yajurveda | 12 |
| **Grand Total** | **96** |

| Sakha | Count |
|---|---|
| Jaimini | 1 |
| Kanva | 8 |
| Kauthuma | 9 |
| Madhyandina | 4 |
| Paippaladam | 5 |
| Shakalya | 13 |
| Taitireeya | 56 |
| **Grand Total** | **96** |

| Locations | State |
|---|---|
| Ahmedabad | Gujarat |
| Bangalore | Karnataka |
| Belagola | Karnataka |
| Chennai | Tamilnadu |
| Coimbatore | Tamilnadu |
| Ernakulam | Kerala |
| Gokarna | Karnataka |
| Govindapuram | Tamilnadu |
| Kumbakonam | Tamilnadu |
| Melkote | Karnataka |
| Melmangalam | Tamilnadu |
| Mumbai | Maharastra |
| Nanjangud | Karnataka |
| Palakkad | Kerala |
| Pondicherry | Tamilnadu |
| Siddharthnagar,UP | UttarPradesh |
| Thirunindravur | Tamilnadu |
| Thiruvaheendrapuram | Tamilnadu |
| Thiruvaiyar | Tamilnadu |
| Thiruvananthapuram | Kerala |

| State | Count |
|---|---|
| Gujarat | 16 |
| Karnataka | 40 |
| Kerala | 6 |
| Maharastra | 1 |
| Tamilnadu | 32 |
| UttarPradesh | 1 |
| **Grand Total** | **96** |




pivstrust.org : pivstrust@gmail.com

# पत्रम्

# 3. वेदानां संरचनात्मकम् अध्ययनम्





**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org ✉: pivstrust@gmail.com



## स्फुटार्थावगत्यर्थं विभिन्नशाखास्थमन्त्रादीनां दृश्यरूपेण परिवर्तनाभ्यासः – तैत्तिरीयसंहितातः

अदि॑त्या॒स्त्वग॑सि॒ प्रति॑ त्वा पृथि॒वी वे॑त्तु दि॒वस्स्कं॑म्भ॒निर॑सि॒ प्रति॒ त्वाऽदि॑त्या॒स्त्व-ग्वे॑त्तु धि॒षणा॑ऽसि॒ पर्व॒त्या प्रति॑ त्वा दि॒वस्स्कं॑म्भ॒निर्वे᳚त्तु धि॒षणा॑ऽसि पार्व॒तेयी प्रति॑ त्वा पर्व॒तिर्वे᳚त्तु (तै.सं. 1.1)

ध्रु॒वम॑सि पृथि॒वीन्दृ॒ꣳहायु॑र्दृꣳह प्र॒जान्दृ॑ꣳह सजा॒ता॒न॒स्मै यज॑मानाय॒ पर्यू॑ह ध॒र्त्रम॑स्य॒न्तरि॑ख्षन्दृꣳह प्रा॒णन्दृ॑ꣳहापा॒नन्दृ॑ꣳह सजा॒ता॒न॒स्मै यज॑मानाय॒ पर्यू॑ह ध॒रुण॑मसि॒ दिव॑न्दृꣳह॒ चख्षुः॑ [10] दृ॒ꣳह॒ श्रोत्र॑न्दृꣳह सजा॒ता॒न॒स्मै यज॑मानाय॒ पर्यू॑ह॒ धर्मा॑ऽसि॒ दिशो॑ दृꣳह॒ योनि॑न्दृꣳह प्र॒जान्दृ॑ꣳह सजा॒ता॒न॒स्मै यज॑मानाय॒ पर्यू॑ह (तै.सं. 1.1)

| किमसि | का प्रतिवेत्तु |
|---|---|
| अदि॑त्या॒स्त्वक् | पृथि॒वी |
| दि॒वस्स्कं॑म्भ॒निः | अदि॑त्या॒स्त्वक् |
| धि॒षणा॑ पर्व॒तिः | दि॒वस्स्कं॑म्भ॒निः |
| धि॒षणा पार्व॒तेयी | प॒र्व॒तिः |

| धारकनाम | स्थानं दृꣳह | फलं1 (दृꣳह) | फलं2 (दृꣳह) |
|---|---|---|---|
| ध्रु॒वम् | पृथि॒वीम् | आयुः॑ | प्र॒जाम् |
| ध॒र्त्रम् | अ॒न्तरि॑ख्षम् | प्रा॒णम् | अ॒पा॒नम् |
| ध॒रुण॑म् | दिव॑म् | चख्षुः॑ | श्रोत्र॑म् |
| धर्म॑ | दिशः॑ | योनि॑म् | प्र॒जाम् |

वेदवारिधिः प. रामानुजाचार्यः

अ॒ग्निर्दे॒वता॑ गा॒य॒त्री छन्द॑ उ॒पा॒ꣳ॒शोः पात्र॑मसि॒ सोमो॑ दे॒वता त्रि॒ष्टुप्छन्दो॑ऽन्तर्या॒मस्य॒ पात्र॑म॒सीन्द्रो॑ दे॒वता॒ जग॑ती॒ छन्द॑ इन्द्रवा॒यु॒वोः पात्र॑मसि॒ बृह॒स्पति॑र्दे॒वता॑ऽनु॒ष्टुप्छन्दो॑ मि॒त्रावरु॑णयोः॒ पात्र॑मस्य॒श्विनौ॑ दे॒वता॑ प॒ङ्क्तिश्छन्दो॒ऽश्विनोः॒ पात्र॑मसि॒ सूर्यो॑ दे॒वता॑ बृह॒ती [18] छन्द॑श्शु॒क्रस्य॒ पात्र॑मसि च॒न्द्रमा॑ दे॒वता॑ स॒तोबृ॑हती॒ छन्दो॑ म॒न्थिनः॒ पात्र॑मसि॒ विश्वे॑ दे॒वा दे॒वतो॒ष्णिहा॒ छन्द॑ आग्रय॒णस्य॒ पात्र॑म॒सीन्द्रो॑ दे॒वता॑ क॒कुच्छन्द॑ उ॒क्थाना॒म्पात्र॑मसि पृथि॒वी दे॒वता॑ वि॒राट्छन्दो॑ ध्रु॒वस्य॒ पात्र॑मसि ॥ [19] (तै.सं. 3.1)

| देवता | छन्दस् | पात्रम् |
|---|---|---|
| अ॒ग्निः | गाय॒त्री | उ॒पा॒ꣳ॒शोः |
| सोम॑ः | त्रि॒ष्टुप् | अ॒न्त॒र्या॒मस्य॑ |
| इन्द्र॑ः | जग॑ती॒ | इ॒न्द्र॒वा॒यु॒वोः |
| बृह॒स्पति॑ः | अ॒नु॒ष्टुप् | मि॒त्रावरु॑णयोः |
| अ॒श्विनौ | प॒ङ्क्तिः | अ॒श्विनोः |
| सूर्य॑ः | बृ॒ह॒ती | शु॒क्रस्य॑ |
| च॒न्द्रमा॑ | स॒तोबृ॑हती | म॒न्थिन॑ः |
| विश्वे॑ दे॒वाः | उ॒ष्णिहा | आ॒ग्र॒य॒णस्य॑ |
| इन्द्र॑ः | क॒कुत् | उ॒क्थाना॒म् |
| पृ॒थि॒वी | वि॒राट् | ध्रु॒वस्य॑ |

श्येनोऽसि गायत्रच्छंन्दा अनु त्वा रंभे स्वस्ति मा सम्पांरय सुपर्णोऽसि त्रिष्टुप्छंन्दा अनु त्वा रंभे स्वस्ति मा सम्पांरय सघांसि जगंतीछन्दा अनु त्वा रंभे स्वस्ति मा सम्पांरय (तै.सं. 3.2)

उक्थंशा इत्यांह प्रातस्सवनम्प्रंतिगीर्य त्रीण्येतान्यक्षरांणि त्रिपदां गायत्री गांयत्रम्प्रांतस्सवनङ्गांयत्रियैव प्रांतस्सवने वज्रंमन्तर्धत्त उक्थँवाचीत्यांह माध्यंन्दिनꣳ सवंनम्प्रतिगीर्य चत्वार्येतान्यक्षरांणि चतुंष्पदा त्रिष्टुप्त्रैष्टुंभम्माध्यंन्दिनꣳ सवंनन्त्रिष्टुभैव माध्यंन्दिने सवंने वज्रंमन्तर्धत्ते [35] उक्थँवाचीन्द्रायेत्यांह तृतीयसवनम्प्रंतिगीर्य सप्तैतान्यक्षरांणि सप्तपंदा शक्वंरी शाक्वरो वज्रो वज्रेंणैव तृंतीयसवने वज्रंमन्तर्धत्ते (तै.सं. 3.2)

| नाम | छन्दः |
|---|---|
| श्येनः | गायत्र-छन्दाः |
| सुपर्णः | त्रिष्टुप्-छन्दाः |
| सघा | जगंती-छन्दाः |

| छन्दः | सवनम् | अक्षरसंख्या | वक्तव्यं पदं | फलम् |
|---|---|---|---|---|
| गायत्री | प्रातः | 3 - त्रिपदा | उक्थंशाः | तेजः |
| त्रिष्टुप् | माद्यन्दिनं | 4 - चतुष्पदा | उक्थँवाचि | इन्द्रियम् |
| शक्वरी | तृतीयं | 7 - सप्तपदा | उक्थँवाचीन्द्रांय | पशवः |

**अभ्यातानाः-** अ॒ग्निर्भू॒ताना॒मधि॑पति॒स्स मा॑व॒त्विन्द्रो ज्ये॒ष्ठाना॒य्यँ॒मꣳ पृ॑थि॒व्या वा॒यु॒र॒न्तरि॑ख्षस्य॒ सूर्यो॑ दि॒वश्च॒न्द्रमा॒ नख्ष॑त्राणा॒म्बृह॒स्पति॒र्ब्रह्म॑णो मि॒त्रस्स॒त्याना॒ँव्वरु॑णो॒ऽपाꣳ स॑मु॒द्रस्स्रो॒त्याना॒मन्न॒ꣳ॒ सा॒म्राज्याना॒मधि॑पति॒ तन्मा॑वतु॒ सोम॒ ओष॑धीनाꣳ सवि॒ता प्र॑स॒वानाꣳ॑ रु॒द्रꣳ प॑शू॒नान्त्वष्टा॑ रू॒पाणा॒ँव्विष्णु॒ꣳ पर्व॑ताना॒म्म॒रुतो॑ ग॒णाना॒मधि॑पतय॒स्ते मा॑ऽवन्तु (तै.सं. 3.4)

| देवता | कस्य अधिपतिः |
|---|---|
| अग्निः | भू॒तानाम् |
| इन्द्रः | ज्ये॒ष्ठानाम् |
| यमः | पृ॒थि॒व्याः |
| वायुः | अ॒न्तरि॑क्षस्य |
| सूर्यः | दि॒वः |
| चन्द्रमा | नक्ष॑त्राणाम् |
| बृहस्पतिः | ब्रह्म॑णः |
| मित्रः | स॒त्यानाम् |

| देवता | कस्य अधिपतिः |
|---|---|
| वरुणः | अ॒पाम् |
| समुद्रः | स्रो॒त्यानाम् |
| अन्नं | साम्राज्यानाम् |
| सोमः | ओष॑धीनाम् |
| सविता | प्र॒स॒वानाम् |
| रुद्रः | प॒शू॒नाम् |
| त्वष्टा | रू॒पाणाम् |
| विष्णुः | पर्व॑तानाम् |
| मरुतः | ग॒णानाम् |

# जयादिषु - राष्ट्रभृतः

ऋताषाडृतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदम्ब्रह्म क्षत्रम्पातु ता इदम्ब्रह्म क्षत्रम्पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवस्सुषुम्नस्सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्स्तवाः प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसो मुदा भुवनस्य पते यस्य त उपरि गृहा इह च । स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ सँव्वथ्सरीणाꣳ स्वस्तिम् । परमेष्ठ्यधिपति-र्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवस्सुक्षितिस्सुभूतिर्भद्रकृथ्सुवर्वान्पर्जन्यो गन्धर्वस्तस्य विद्युतो-ऽप्सरसो रुचो दूरेहेतिरमृडयो मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो गन्धर्वस्तस्याधयोऽप्सरसश्शोचयन्तीर्नाम स इदम्ब्रह्म क्षत्रम्पातु ता इदम्ब्रह्म क्षत्रम्पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा ... (तै.सं. 3.4)

वेदवारिधिः प. रामानुजाचार्यः

| गन्धर्वस्य विशेषणम् | गन्धर्वः | अप्सरसः | अप्सरसां नाम |
|---|---|---|---|
| ऋ॒ता॒षाट् ऋ॒तधा॑मा | अ॒ग्निः | ओष॑धयः | ऊर्ज॑ः |
| सꣳहि॒तो वि॒श्वसा॑मा | सूर्य॑ः | मरी॑चयः | आ॒युव॑ः |
| सु॒षु॒म्नः सूर्य॑रश्मिः | च॒न्द्रमाः | नख्ष॑त्राणि | बे॒कुर॑यः |
| भु॒ज्युः सु॒प॒र्णः | य॒ज्ञः | दख्षि॑णाः | स्त॒वाः |
| प्र॒जाप॑तिः वि॒श्वक॑र्मा | मन॑ः | ऋ॒ख्सा॒मानि॑ | वह्न॑यः |
| इ॒षि॒रः वि॒श्वव्य॑चाः | वात॑ः | आप॑ः | मु॒दाः |
| प॒र॒मे॒ष्ठी, अधि॑पतिः | मृ॒त्युः | विश्वम् | भुव॑ः |
| सु॒ख्षि॒तिः, सु॒भू॑तिः, भ॒द्र॒कृत्, सु॒व॑र्वान् | प॒र्जन्य॑ः | वि॒द्युत॑ः | रुच॑ः |
| दू॒रेहे॑तिः, अ॒मृ॒ड॒यः | मृ॒त्युः | प्र॒जाः | भी॒रुव॑ः |
| चारु॑ः, कृ॒प॒ण॒का॒शी | काम॑ः | आ॒धय॑ः | शो॒चय॑न्तीः |

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना वषट्कारेण वज्रेण पूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदेऽस्मिन्क्षयेऽस्मिन्भूमिलोके योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मो विष्णोः क्रमेणात्येनान्क्रामामीन्द्रेण देवेन पृतना जयामि त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण [10] सहजान्विश्वेभिर्देवेभिः पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजानिन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः । (3.5)

| देवः | छन्दः | स्तोमः | साम | भ्रातृव्याः |
|---|---|---|---|---|
| अग्निः | गायत्रेण | त्रिवृता | रथन्तरेण | पूर्वजान् |
| इन्द्रः | त्रैष्टुभेन | पञ्चदशेन | बृहता | सहजान् |
| विश्वे देवाः | जागतेन | सप्तदशेन | वामदेव्येन | अपरजान् |

---

यस्य खादिरस्स्रुवो भवति छन्दसामेव रसेनाव द्यति ..... यत्पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्राष्ट्रमेव विश्यध्यूहति प्रजापतिर्वा अजुहोत्सा यत्राहुतिः प्रत्यतिष्ठत्ततो विकङ्कत उदतिष्ठत्ततः प्रजा असृजत यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्याहुतयस्तिष्ठन्ति

| वृक्षः | यज्ञसाधनम् |
|---|---|
| खादिरः | स्रुवः |
| पर्णमयी | जुहूः |
| आश्वत्थी | उपभृत् |
| वैकङ्कती | ध्रुवा |

1 वस॑वस्त्वा॒ परि॑गृह्णन्तु गाय॒त्रेण॒ छन्द॑सा रु॒द्रास्त्वा॒ परि॑गृह्णन्तु॒ त्रैष्टु॑भेन॒ छन्द॑साऽऽदि॒त्यास्त्वा॒ परि॑गृह्णन्तु॒ जाग॑तेन॒ छन्द॑सा [1.1.15];

| देवताः | परिगृह्णन्तु छन्दोभिः |
|---|---|
| वस॑वः | गा॒य॒त्रेण॑ |
| रु॒द्राः | त्रैष्टु॑भेन |
| आ॒दि॒त्याः | जाग॑तेन |

2 वस॑वस्त्वा॒ प्र वृ॑हन्तु गाय॒त्रेण॒ छन्द॑सा॒ऽग्नेᳲ प्रि॒यम्पाथ॒ उपे॑हि रु॒द्रास्त्वा॒ प्र वृ॑हन्तु॒ त्रैष्टु॑भेन॒ छन्द॒सेन्द्र॑स्य प्रि॒यम्पाथ॒ उपेह्यादि॒त्यास्त्वा॒ प्र वृ॑हन्तु॒ जाग॑तेन॒ छन्द॑सा॒ विश्वे॑षान्दे॒वानाम्प्रि॒यम्पाथ॒ उपे॑हि (3.3.5);

| देवताः | प्रवृहन्तु छन्दोभिः | कस्य प्रियम्पाथः (उपेहि) |
|---|---|---|
| वस॑वः | गा॒य॒त्रेण॑ | अग्नेः |
| रु॒द्राः | त्रैष्टु॑भेन | इन्द्रस्य |
| आ॒दि॒त्याः | जाग॑तेन | विश्वे॑षां देवानाम् |

3 वसं॑वस्त्वा कृण्वन्तु गाय॒त्रेण॒ छन्द॑साङ्गिर॒स्वत्पृ॑थि॒-
व्य॑सि रु॒द्रास्त्वा॑ कृण्वन्तु॒ त्रैष्टु॑भेन॒ छन्द॑साङ्गिर॒स्वद॒न्त-
रि॑क्षमस्यादि॒त्यास्त्वा॑ कृण्वन्तु॒ जाग॑तेन॒ छन्द॑साङ्गि-
र॒स्वद्द्यौर॑सि॒ विश्वे त्वा दे॒वा वैश्वान॒राः कृ॑ण्व॒न्त्वानु॑ष्टुभेन॒
छन्द॑साङ्गिर॒स्वद्दिशो॑ऽसि ध्रु॒वासि॑ धा॒रया॒ मयि॑ प्र॒जाꣳ
रा॒यस्पोषं॑ गौप॒त्यꣳ सु॒वीर्य॑ꣳ सजा॒तान्यज॑माना॒यादि॑त्यै॒
रास्ना॒स्यदि॑तिस्ते॒ बिलं॑ गृह्णातु॒ पाङ्क्ते॑न॒ छन्द॑साङ्गिर॒स्वत् ।
(4.1.20,21)

| देवताः | कृण्वन्तु छन्दोभिः - अङ्गिरस्वत् |
|---|---|
| वसं॑वः | गा॒य॒त्रेण॑ - पृ॒थि॒वी |
| रु॒द्राः | त्रैष्टु॑भेन - अ॒न्तरि॑क्षम् |
| आ॒दि॒त्याः | जाग॑तेन - द्यौः |
| विश्वे॑ दे॒वा वैश्वान॒राः | आनु॑ष्टुभेन – दिशः॑ |
| (समष्टिः - अदितिः) | पाङ्क्ते॑न - अदि॑त्यै॒ रास्ना (ध्रु॒वा) |

4 वसं॑वस्त्वा धूपयन्तु गाय॒त्रेण॒ छन्द॑साङ्गिर॒स्वद्रु॒द्रा-
स्त्वा॑ धूपयन्तु॒ त्रैष्टु॑भेन॒ छन्द॑साङ्गिर॒स्वदा॑दि॒त्यास्त्वा॑
धूपयन्तु॒ जाग॑तेन॒ छन्द॑साङ्गिर॒स्वद्विश्वे त्वा दे॒वा वैश्वा-
न॒रा धू॑पय॒न्त्वानु॑ष्टुभेन॒ छन्द॑साङ्गिर॒स्वदिन्द्र॑स्त्वा
धूपयत्वङ्गिर॒स्वद्विष्णु॑स्त्वा धूपयत्वङ्गिर॒स्वद्वरु॑णस्त्वा
धूपयत्वङ्गिर॒स्वत् (4.1.22)

| देवताः | छन्दोभिः - धूपयन्तु अङ्गिरस्वत् |
|---|---|
| वसं॑वः | गा॒य॒त्रेण॑ |
| रु॒द्राः | त्रैष्टु॑भेन |
| आ॒दि॒त्याः | जाग॑तेन |
| विश्वे॑ दे॒वा वैश्वान॒राः | आनु॑ष्टुभेन |
| इन्द्रः, विष्णुः, वरुणः | धूपयन्तु (विना छन्दः) |

5 वसंवस्त्वाऽऽच्छृंन्दन्तु गायत्रेण छन्दंसाङ्गिरस्व- द्रुद्रास्त्वाऽऽच्छृंन्दन्तु त्रैष्टुंभेन छन्दंसाङ्गिरस्वदांदित्या- स्त्वाऽऽच्छृंन्दन्तु जागंतेन छन्दंसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आच्छृंन्दन्त्वानुंष्टुभेन छन्दंसाङ्गिरस्वत् ॥ (4.1.24)

| देवताः | आच्छृन्दन्तु छन्दोभिः |
|---|---|
| वसंवः | गायत्रेणं |
| रुद्राः | त्रैष्टुंभेन |
| आदित्याः | जागंतेन |
| विश्वे देवा वैश्वानराः | आनुंष्टुभेन |

6 वसंवस्त्वा रुद्रैः पुरस्तात्पान्तु पितरंस्त्वा यमरांजानः पितृभिंर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वैर्देवैः पश्चात्पान्तु द्युतानस्त्वां मारुतो मरुद्भिंरुत्तरतः पांतु देवास्त्वेन्द्रंज्येष्ठा वरुंणराजानोऽधस्ताच्चोपरिंष्टाच्च पान्तु [5.5.40,41]

| देवताः | देवैः | दिशि पान्तु |
|---|---|---|
| वसंवः | रुद्रैः | पुरस्तात् |
| यमराजानः पितरः | पितृभिः | दक्षिणतः |
| आदित्याः | विश्वैः देवैः | पश्चात् |
| द्युतानः | मरुद्भिः | उत्तरतः (पातु) |
| देवाः इन्द्रज्येष्ठाः वरुणराजानः | - | अधस्तात् उपरिष्टाच्च |

7 वसंवस्त्वाञ्जन्तु गायत्रेण छन्दंसा रुद्रास्त्वाञ्जन्तु त्रैष्टुंभेन छन्दंसादित्यास्त्वाञ्जन्तु जागंतेन छन्दंसा (7.4.51) (माध्यन्दिन सं. 23.8)

| देवताः | अञ्जन्तु छन्दोभिः |
|---|---|
| वसंवः | गायत्रेणं |
| रुद्राः | त्रैष्टुंभेन |
| आदित्याः | जागंतेन |

अ॒यम्पु॒रो हरि॑केश॒स्सूर्य॑रश्मि॒स्तस्य॑ रथगृथ्सश्च॒ रथौ॑जाश्च सेनानिग्राम॒ण्यौ॑ पुञ्जिकस्थ॒ला च॑ कृतस्थ॒ला चाप्स॒रसौ॑ यातु॒धाना॑ हे॒ती रख्खा॑ꣳसि॒ प्रहे॑ति॒रय॒न्दक्खि॒णा वि॒श्वक॑र्मा॒ तस्य॑ रथस्व॒नश्च॒ रथे॑चित्रश्च सेनानिग्राम॒ण्यौ॑ मेन॒का च॑ सहज॒न्या चाप्स॒रसौ॑ द॒ङ्क्ष्णवः॑ प॒शवो॑ हे॒तिः पौरु॑षेयो व॒धः प्रहे॑ति॒रयम्प॒श्चाद्वि॒श्वव्य॑चा॒स्तस्य॒ रथ॑प्रोत॒श्चास॑मरथश्च सेनानिग्राम॒ण्यौ प्र॒म्लोच॑न्ती चानु॒म्लोच॑न्ती चाप्स॒रसौ॑ स॒र्पा हे॒तिर्व्या॒घ्राः प्रहे॑ति॒रयमु॑त्त॒रात्सँ॒य्यद्व॑सु॒स्तस्य॑ सेन॒जिच्च॑ सु॒षेण॑श्च सेनानिग्राम॒ण्यौ॑ वि॒श्वाची॑ च घृ॒ताची॑ चाप्स॒रसा॒वापो॑ हे॒तिर्वात॒ः प्रहे॑ति॒रयमु॒पर्य॒र्वाग्व॑सु॒स्तस्य॒ तार्ख्ष्य॒श्चारि॑ष्टनेमिश्च सेनानिग्राम॒ण्या॑वु॒र्वशी॑ च पू॒र्वचि॑त्तिश्चाप्स॒रसौ॑ वि॒द्युद्धे॒तिर॑व॒स्फूर्ज॒न्प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तँवो॒ जम्भे॑ दधामि (तै.सं. 4.4.7,8)

| दिक् | पालकः | सेनानीः | ग्रामणीः | अप्सराः 1 | अप्सराः 2 | हेतिः | प्रहेतिः |
|---|---|---|---|---|---|---|---|
| पु॒रः | हरि॑केश॒ः सूर्य॑रश्मिः | र॒थ॒गृ॒थ्सः | रथौ॑जाः | पु॒ञ्जि॒क॒स्थ॒ला | कृ॒त॒स्थ॒ला | या॒तु॒धानाः | रख्खा॑ꣳसि |
| द॒क्खि॒णा | वि॒श्वक॑र्मा | र॒थ॒स्व॒नः | रथे॑चित्रः | मे॒न॒का | स॒ह॒ज॒न्या | द॒ङ्क्ष्णवः॑प॒शवः | पौरु॑षेयो व॒धः |
| प॒श्चात् | वि॒श्वव्य॑चाः | रथ॑प्रोतः | अस॑मरथः | प्र॒म्लोच॑न्ती | अ॒नु॒म्लोच॑न्ती | स॒र्पाः | व्या॒घ्राः |
| उ॒त्त॒रात् | सं॒यद्व॑सुः | से॒न॒जित् | सु॒षेण॑ः | वि॒श्वाची | घृ॒ताची | आप॑ः | वात॑ः |
| उ॒परि॑ | अ॒र्वाग्व॑सुः | तार्ख्ष्य॑ः | अरि॑ष्टनेमिः | उ॒र्वशी | पू॒र्वचि॑त्तिः | वि॒द्युत् | अ॒व॒स्फूर्ज॒न् |

# तैत्तिरीयोपनिषदः पट्टिकाः

(तै.आ. 5.3) महासꣳहिताः

| | अधिलोकम् | अधिज्यौतिषम् | अधिविद्यम् | अधिप्रजम् | अध्यात्मम् |
|---|---|---|---|---|---|
| पूर्वरूपम् | पृथिवी | अग्निः | आचार्यः | माता | अधराहनुः |
| उत्तररूपम् | द्यौः | आदित्यः | अन्तेवासी | पिता | उत्तराहनुः |
| सन्धिः | आकाशः | आपः | विद्या | प्रजा | वाक् |
| सन्धानम् | वायुः | वैद्युतः | प्रवचनम् | प्रजननम् | जिह्वा |

(तै.आ. 5.5) **महाव्याहृतयः**

| महाव्याहृतयः | स्थानम् (लोकाः) | देवता (ज्योतींषि) | वेदः | प्राणपरिणामः |
|---|---|---|---|---|
| भूः | अयं लोकः | अग्निः | ऋचः | प्राणः |
| भुवः | अन्तरिख्षम् | वायुः | सामानि | अपानः |
| सुवः | असौ लोकः | आदित्यः | यजूꣳषि | व्यानः |
| महः | आदित्यः | चन्द्रमाः | ब्रह्म | अन्नम् |

# तैत्तिरीयोपनिषदि आनन्दमीमांसा

भी॒षाऽस्मा॒द्वातः॑ पवते । भी॒षोदे॑ति॒ सूर्यः॑ । भीषाऽस्मादग्नि॑श्चेन्द्र॒श्च । मृत्युर्धावति पञ्च॑म इ॒ति ॥

यतो॒ वाचो॒ निव॑र्तन्ते । अप्राप्य॒ मन॑सा स॒ह । आनन्दं ब्रह्म॑णो वि॒द्वान् । न बिभेति कुत॑श्चने॒ति ॥

| अधिकारिपुरुषः | (ते ये शतं) शतगुणितः आनन्दः |
|---|---|
| मानुषः | 1 |
| मनुष्यगन्धर्वाः | X * 100 |
| देवगन्धर्वाः | X * 100 *100 |
| चिरलोकलोकाः पितरः | X * 100 *100*100 |
| आजानजाः देवाः | X * 100 *100*100*100 |
| कर्मदेवाः देवाः (ये कर्मणा देवान् अपियन्ति) | X * 100 *100*100*100*100 |
| देवाः | X * 100 *100*100*100*100*100 |
| इन्द्रः | X * 100 *100*100*100*100*100*100 |
| बृहस्पतिः | X * 100 *100*100*100*100*100*100*100 |
| प्रजापतिः | X * 100 *100*100*100*100*100*100*100*100 |
| ब्रह्म | X * 100 *100*100*100*100*100*100*100*100*100<br>अनन्तम् (यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह) |

# तैत्तिरीयोपनिषदि ब्रह्ममीमांसा

यतो॒ वा इ॒मानि॒ भूता॑नि॒ जाय॑न्ते । येन॒ जाता॑नि॒ जीव॑न्ति । यत्प्रय॑न्त्य॒भिसंवि॑शन्ति । तद्विजि॑ज्ञासस्व । तद्ब्रह्मेति॑ ॥

| पुरुषः | ब्रह्मेति व्यजानात् | ह्येव खल्विमानि भूतानि जायन्ते | जातानि जीवन्ति | प्रयन्त्यभिसँविशन्ति |
|---|---|---|---|---|
| अन्नमयः | अन्नम् | अन्नात् | अन्नेन | अन्नम् |
| प्राणमयः | प्राणः | प्राणात् | प्राणेन | प्राणम् |
| मनोमयः | मनः | मनसः | मनसा | मनः |
| विज्ञानमयः | विज्ञानम् | विज्ञानात् | विज्ञानेन | विज्ञानम् |
| आनन्दमयः | आनन्दः | आनन्दात् | आनन्देन | आनन्दम् |

# तैत्तिरीयोपनिषदि पञ्चकोशाः

| शारीर-आत्मनाम | अवयवाः | | | | |
|---|---|---|---|---|---|
| | शिरः | दक्षिणः पक्षः | उत्तरः पक्षः | आत्मा | पुच्छम् |
| १ अन्नमयः | इदम् | अयम् | अयम् | अयम् | इदम् |
| २ प्राणमयः | प्राणः | व्यानः | अपानः | आकाशः | पृथिवी |
| ३ मनोमयः | यजुः | ऋक् | साम | आदेशः | अथर्वाङ्गिरसः |
| ४ विज्ञानमयः | श्रद्धा | ऋतम् | सत्यम् | योगः | महः |
| ५ आनन्दमयः | प्रियम् | मोदः | प्रमोदः | आनन्दः | ब्रह्म |

स॒त्यं ज्ञा॒नम॑न॒न्तं ब्रह्म॑ । यो वेद॒ निहि॑त॒ङ्गु॒हा॑यां पर॒मे व्यो॑मन्न् । सोऽश्नु॒ते सर्वा॒न्कामान्थ्स॒ह । ब्रह्म॑णा विप॒श्चितेति॑ ॥

१. अन्ना॒द्वै प्र॒जाः प्र॒जाय॑न्ते । याः काश्च॑ पृथि॒वीꣳ श्रि॒ताः । अथो॒ अन्ने॑नै॒व जीव॑न्ति । अथै॑न॒दपि॑ यन्त्यन्त॒तः ॥

२. प्रा॒णन्दे॒वा अनु॒ प्राण॑न्ति । म॒नु॒ष्याः प॒शव॑श्च॒ ये । प्रा॒णो हि भू॒ताना॒मायु॑ः । तस्माथ्सर्वायु॒षमु॑च्यते ॥

३. यतो॒ वाचो॒ निव॑र्तन्ते । अप्राप्य॒ मन॑सा स॒ह । आनन्दं ब्रह्म॑णो वि॒द्वान् । न बिभेति कदा॑चने॒ति ॥

४. वि॒ज्ञान॑य्यँ॒ज्ञन्त॑नुते । कर्मा॑णि तनु॒तेऽपि॑ च । वि॒ज्ञान॑न्दे॒वास्सर्वे॑ । ब्रह्म॒ ज्येष्ठ॒मुपा॑सते ॥

५. अस॑न्ने॒व स॑ भवति । अस॒द्ब्रह्मेति॒ वेद॒ चेत् । अस्ति ब्रह्मेति॑ चेद्वे॒द । सन्तमेनन्ततो वि॑दुरि॒ति ॥

अस॒द्वा इ॒दमग्र॑ आसीत् । ततो॒ वै सद॑जायत । तदात्मानꣳ स्वय॑मकु॒रुत । तस्मात्तथ्सुकृतमुच्य॑त इ॒ति ॥


# योजनीयम्

- क(त)स्मै देवाय हविषा विधेम, शरदःशतम्, तस्यैवं विदुषः, प्राजापत्यो हारुणिः

pivstrust.org : pivstrust@gmail.com


# अन्नस्य श्रैष्ठ्यम्

याभि॑रादि॒त्यस्तप॑ति र॒श्मिभि॒स्ताभिः॑ प॒र्जन्यो॑ वर्ष॒ति प॒र्जन्ये॑नौषधिवनस्प॒तय॑ः प्रजा॑यन्त ओषधिवनस्प॒तिभि॒रन्नं॑ भवति




वेदवारिधिः प. रामानुजाचार्यः





**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org : pivstrust@gmail.com

# अन्नस्य श्रैष्ठ्यम्

भूतानां प्राणमयादयः आनन्दमयान्ताः अन्नात् अन्नमयात् भवन्ति ।

याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति
पर्जन्येनौषधिवनस्पतयः प्रजायन्त
ओषधिवनस्पतिभिरन्नं भवति

अन्नम् — प्राणाः — बलम् — तपः — श्रद्धा — मेधा — मनीषा — मनः — शान्तिः — चित्तम् — स्मृतिः — स्मारम् — विज्ञानम् — आत्मवेदनम्

अन्नेन **प्राणाः** भवन्ति ।
**बलं** कार्यकरणसामर्थ्यम्
**तपो** यमनियमादिः
**श्रद्धा** औत्सुक्यम्
**मेधा** बुद्धिप्रकर्षः
**मनीषा** मनस ईषा वश्येन्द्रिया बुद्धिरेव।
**मनः** अवलिप्तम् ।

स्वाभिमतसंपादकं **शान्ति**रूपं उपशमः ।
अतद्व्यावृत्तिः **चित्तं**, स्वाभिमतालम्बनप्रतिष्ठं मनस्तत्त्वान्तरं वा भवतीति । एवं सर्वत्र ।
**स्मृतिः** अनुभूतवस्तुध्यानं, तां चित्ते वेदयति वेदयते अनुभवति ।
अथ स्मृत्या **स्मारं** वेदयते अनभिभूतार्थस्मृतिभवं वैराग्यं स्मारं, मानसमिति यदुक्तम् ।
स्मारयतीति स्मरं मनः । तत्र भवः स्मारः उत्सादिर्द्रष्टव्यः ।
स्मारेण **विज्ञानं** वेदयते । विलक्षणज्ञानं विज्ञानम् ।
यत्र सर्वदार्ढ्यं पश्यति न्यासमित्यर्थः ।
अथ विज्ञाने**नात्मानं वेदयते** । एवं न्यासादात्मप्राप्तिरुक्ता ।
अत्र च उक्तेन क्रमेण **प्राणादेराध्यात्मिकवर्गस्य अन्नं लिङ्गं कारण**मुक्तम् ।
तत्र प्रसङ्गादन्नं स्तौति यस्मादेवं महानुभावमन्नं,
**तस्मात् तत् ददन् सर्वाणि प्राणाद्यात्मान्तानि ददाति ॥**

वेदवारिधिः प. रामानुजाचार्यः

# एकस्यैव पदस्य स्वरभेदात् अर्थभेदः

- स्वः – **अव्ययम्** – स्वर्गलोकार्थकः - यथा - ऋग्वेदे बहुत्र - स्वरिति स्वः ।, स्वःपती इति स्वःऽपती । (ऋ.सं. 9.1.9.2), भूर्भुवस्स्वः (तै.ब्रा. काठके 1.5)
- स्वः – **तिङन्तम्** – अस धातुः उत्तमपुरुषद्विवचनम् – यथा - मा प्र हारावमन्तः स्व इति, (अन्तः । स्वः । इति ।) अभि सन्दष्टौ वै **स्वो** न शक्नुव ऐतुमिति (वै । **स्वः** । न । शक्नुवः ।) (तै.सं. 2.5.10), आवमीश्वरौ कर्तोः **स्व** इति (कर्तोः । स्वः । इति ।) (तै.सं. 2.6.36)
- स्वः – **सुबन्तम्** – आत्म,आत्मीय,ज्ञाति,धनवाची – पूर्वतनार्थद्वये सर्वनाम, उत्तरार्थद्वये सामान्यशब्दवत् – यथा – न हि **स्वः स्वं** हिनस्ति । (हि । स्वः । **स्वम्** ।) (तै.सं. 5.1.35), योऽस्य **स्वो**ऽग्निस्तमपि (यः । अस्य । स्वः । अग्निः । तम् ।) (तै.सं. 5.7.36)

वेदवारिधिः प. रामानुजाचार्यः





# माध्यन्दिनसंहितायां विचारणीयांशः

- अस्मत्सविधस्थ माध्यन्दिनपदपाठे स्व॑ः इति पदस्य बहुप्रकारेण टङ्कनं दृश्यते । यथा – स्व॒रिति॒ स्व॒ः (2.25), (3.6), स्व॒रिति॒ स्व॒ः। (3.37), (7.45), स्व॒रिति॒ स्व॑ः। (4.25), (7.29), स्व॑ः। ज्योति॑ः (8.52, 9.21..), स्व॒रिति॒ स्व॑ः। (8.53), स्व॒रिति॒ स्व॒ः। (27.10), (32.12), स्व॒रिति॒ स्व॒ः। (35.14), भूः। भुव॑ः। स्व॒ः। तत्। स॒वि॒तुः। वरे॑ण्यम्। (36.3), स्व॒र्ग्या॒येति॑ स्व॒ःऽग्या॒य॒। (11.2), स्व॒ इति॑ स्व॒ः। (11.22), न॒य॒। स्व॒ः। दे॒वेषु॑। (15.55), (18.63), परि॑। स्व॒ः। पश्य॑न्तः। (20.21), । अत्र विचारविमर्शस्य आवश्यकता अस्ति ॥

वेदवारिधिः प. रामानुजाचार्यः





**पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)**

pivstrust.org ✉: pivstrust@gmail.com



# स्वरभेदात् अर्थभेदः

स्वरे भेदेन पदस्य अर्थः भिद्यते । दृष्टान्ताः यश॑ः आद्युदात्तः नपुंसकलिङ्गकः कीर्ति, प्रथाद्यर्थकः. स एव अन्तोदात्तश्चेत्, य॒शस॑म्, य॒शाः इत्यादिषु यशस्वी, कीर्तिमान् इत्यर्थकः, पुँल्लिङ्गश्च ।

द्यु॒म्निन्त॑मं॒ **यश॑ः** (ऋ.सं. ८.१९.६); **य॒शस॑** वी॒रव॑त्तमम् (ऋ.सं. १.१.३); त्वमि॑न्द्र **य॒शा** अ॑सि (ऋ.सं. ८.९०.५);

तथैव, '**ब्रह्म**'पदं नपुंसके, आद्युदात्तं, वेदः, तपः तथा परतत्त्वं बोधयति (अमरकोशे 3.3.114 – वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः) । अन्तोदात्ते पुँल्लिङ्गः ब्राह्मणं चतुर्मुखं च बोधयति । यथा - **ब्रह्म॑ ब्र॒ह्मा**ऽभ॑वथ्स्व॒यम् (तै. का. ३.९.३). अन्ये केचन शब्दाः वर्णसाम्येऽपि स्वरभेदात् भिन्नार्थकाः द्रष्टव्याः ।

1. **ते** – सर्वनाम-पुँल्लिङ्ग-तच्छब्द-प्रथमा-बहुवचनम् उदात्तम् । **ते** ते॑ पिबन्तु जि॒ह्वया (ऋ. सं. १.१४.८)

**ते॒** – अनुदात्तः पुरतः स्थिताय, स्थितस्य वा इत्यर्थकः (चतुर्थी षष्ठी एकवचनं युष्मच्छब्दस्य) ये **ते॒** पन्थाः सवितः पू॒र्व्यास॑ः (ऋ.सं. १.३५.११);

2. **दा॒सः** – सेवकः (द्रव्यम्), यथा - स्व॒यं **दा॒स** उरो॒ अंसा॒वपि॑ ग्ध (ऋ.सं. १.१५८.५), परन्तु, **दास॑ः** - दास्यगु॒ण(विशेषण)कः, यथा - यो **दास॑ं** वर्ण॒मध॑रं॒ गुहाक॑ः (ऋ.सं. २.१२.४);

3. **धर्म॑न्** – नपुंसके, आद्युदात्ते धरणं धर्मं चाह, यथा - दि॒वो धर्म॑न् ध॒रुणे॑ से॒दुषो॒ नॄन् (ऋ.सं. ५.१५.२) अन्तोदात्ते पुंसि तु धार्मिकव्यक्तिवाचकः, यथा - **ध॒र्मन्** - ध॒र्मा भुव॑द्वृज॒न्य॑स्य॒ राजा (ऋ.सं. ९.९७.२३);

4. **दाम॑न्** - नपुंसके, आद्युदात्ते सूत्र, रज्जुवाची, यथा - यद्वा॒जिनो॒ दाम॑ स॒न्दान॒मर्व॑तः (ऋ.सं. १.१६२.८) अन्तोदात्ते पुंसि तु **दा॒मन्** - दातृवाची, यथा - रा॒यो दा॒मा म॑ती॒नाम् (ऋ.सं. ६.४४.२);

5. **द्वाद॑श** – संख्यावाची आद्युदात्तः, यथा - वेद॑ मा॒सो धृ॒तव्र॑तो॒ द्वाद॑श प्र॒जाव॑तः (ऋ.सं. १.२५.८) अन्तोदात्ते तु **द्वा॒द॒श** – क्रमे द्वादशत्ववाची, यथा - दे॒वहि॑तिं जुगुपाद्द्वा॒द॒शस्य॑ (ऋ.सं. ७.१०३.९);

वेदवारिधिः प. रामानुजाचार्यः







# स्वरभेदात् अर्थभेदः

6. **भूमन्** – नपुंसके आद्युदात्ते, पृथिवी, यथा - चर्मेवोदभिर्व्युन्दन्ति **भूम** (ऋ.सं. १.८५.५) अन्तोदात्ते पुंसि तु, **भूमन्** - वैपुल्यम् यथा - सौधन्वनासश्चरितस्य **भूमना**ऽऽगच्छत ; अपां **भूमान**मुप नः सृजेह (ऋ.सं. १.११०.२, १०.९८.१२);

7. **युवभ्याम्** – मध्योदात्तः युष्मच्छब्दे, यथा - अरमिन्द्राग्नी मनसे युवभ्याम् (ऋ.सं. १.१०८.२) आद्युदात्तश्चेत् युवन्शब्दात् **युवभ्याम्** – यथा - नमो युवभ्यो नम आशिनेभ्यः ; ससान मर्यो युवभिर्मखस्यन् (ऋ.सं. १.२७.१३, ३.३१.७);

8. **रक्षः** - नपुंसके, राक्षसत्वं, (व्रणं वा), यथा - इन्द्राग्नी रक्ष उब्जतम् (ऋ.सं. १.२१.५) पुंसि तु, **रक्षः** – राक्षसः, अपसेधन्रक्षसो यातुधानान्; यो वा रक्षाः शुचिरस्मीत्याह (ऋ.सं. १.३५.१०, ७.१०४.१६);

9. **वरिमन्** - नपुंसके, आद्युदात्ते विस्तीर्णं, यथा - मितज्ञवो वरिमन्ना पृथिव्याः (ऋ.सं. ३.५९.३) । अन्तोदात्ते पुंसि, **वरिमन्** - व्याप्तिः, यथा - दिवश्चिदस्य **वरिमा** वि पप्रथे (ऋ.सं. १.५५.१), **वरिमा** च मे । (तै.सं. 4.7.3)

10. **आभिः** – **आभिः** । उभयमपि यद्यपि सर्वनामैव, तथापि स्वरभेदः उद्देश्यभेदेन भवति । निर्दिष्टविशेषण, अनिर्दिष्ट (सार्वत्रिक) विशेषणत्वेन भेदः । यथा – १. **आभिः** । ते । अद्य । गीर्भिः ।, २, तम् । एव । **आभिः** । उपेति ।, ३. **आभिः** । एव । अमूः । (तै.सं. ४.४.१६, ३.४.३५, २.४.२९). एषु आद्यान्त्ययोः निर्दिष्टविशेषणत्वमस्ति – गिराम् अपां च क्लृप्तानां विषये । मध्यमे तु सार्वत्रिकत्वं, ‘यस्मै कामाय निरुप्यन्ते’ इति देविकाहविषां प्रजापशुकामादिव्यतिरिक्तसर्वकामनायां क्लृप्तनिर्देशरहितत्वात् ।

वेदवारिधिः प. रामानुजाचार्यः

# स्वरभेदात् अर्थभेदः

11. **वसन्तम्** – इति शब्दः अन्तोदात्तः वसन्तमृतूनां प्रीणामि (तै.सं. १.६.५) इत्यत्रेव कालविशेष-रूपऋतुवाची । **वसन्तम्** - इति आद्युदात्तः तु, ब्रह्मचर्यं **वसन्तम्** निरभजत् (तै.सं. ३.१.३०) इत्यत्रेव शत्रन्तं वास-कर्तृवाची ।

12. **अजानाम्** – यदजस्तदजानामेतावन्तः (तै.सं. २.१.५) सुबन्ते अकारान्तपुँल्लिङ्ग-षष्ठीबहुवचनम् ।
**अजानाम्** – मनसाऽऽरादजनामवो दिवा (तै.सं. ४.६.३५) इत्यत्रेव तिङन्ते उत्तमपुरुषैकवचनम् ।

13. **तृतीयम्** – त्रिवारम् । द्वितीयन्तृतीयम् । (तै.ब्रा. का. २.५०) इत्यादिषु । **तृतीयम्** – तृतीयमिन्द्रियस्यापाक्रामत् (तै.ब्रा. १.५.) इत्यादिष्विव त्रेधा विभक्तैकदेशवाची ।

समानानुपूर्वीकपदानि सुबन्तानि वा तिङन्तानि वा अव्ययुक्तानि वा भवितुमर्हन्ति विभिन्ननिष्पत्त्या, स्वरयोगाद्वा ।

1. यथा - तस्मान्नानादेवत्यानि **सन्ति** वायव्यान्युच्यन्ते (तै.सं. ६.४.६.७); सन्तिशब्दः सुबन्तोऽत्र । नपुंसके सच्छब्दप्रथमा,द्वितीयाबहुवचनम् । *यत्र* पूर्वे साध्याः **सन्ति** देवाः (तै.आ. 3.38) इति पुरुषसूक्ते तु तिङन्तः यद्वृत्तात् आद्युदात्तश्च ॥ ह्यस्य राध **ऐति** (तै.सं. ६.६.३) इत्यत्र हियोगात् *एति* इति क्रियापदस्य आद्युदात्तत्वम् । पदपाठे **एति** । **एति** । इति भवति, प्रथमं उपसर्गस्येतिकरणं

2. अङ्गिरसः सुवर्गं लोकं **यतः** पुरोडाशः कूर्मो भूत्वानुप्रासर्पत् (तै.सं. ५.२.८.४); **यतः** पुरोडाशः - यतः सुबन्तमत्र। पुँल्लिङ्गे शत्रन्ते द्वितीयाबहुवचनम् । यद्वृत्ते यच्छब्दात् तसिल्प्रत्ययान्तः अन्तोदात्तः स्वरभेदकः अनुवादकत्वापादनात्।

# स्वरभेदहेतवः दृष्टान्तैः सह

**यथा** - तं नेमिमृभवो यथाऽऽनमस्व सहूतिभिः (तै.सं. २.६.११.१); आ सव संवितुर्यथा भगस्येव भुजिं हुवे (तै.सं. ३.१.११.८); सादृश्ये गम्यमाने यथा-शब्दः आद्युदात्तः प्रयुज्यते । प्रकारवचने थाल् इति यच्छब्दात् यादृगिति विवक्षणे आद्युदात्तः । पादान्ते सर्वानुदात्तः । **यथा** – [पूर्वोक्तस्थलद्वये] यद्वृत्ते नान्तर्गतः । यथाऽसादृश्ये (अष्टा. 2.1.7) । यथेति पादान्ते इत्युणादिसूत्रात् ।

महर्षिणा पाणिनिना सुबन्त, तिङन्त, अव्ययादीनाम् औत्सर्गिकस्वराः, तेषां स्वरभेदहेतवश्च सम्यक् सूत्रिताः । हेतुषु पदान्तरसमभिव्याहारः, समासः, वाक्ये प्रयोगः स्थानं च (आदि-मध्य-अन्तेषु) निर्दिष्टाः । यथा :

1. **विश्वाहा** इति पदं पादादौ सत् विभिन्नस्वरयुक्तो दृश्यते । ['सर्वेषु अहःसु'] -

i). इन्द्रो नस्तत्र वृत्रहा **विश्वाहा** शर्म यच्छतु (तै.सं. ४.६.४.५); पदपाठे - विश्वाहेति विश्व-हा । इङ्ग्यं समस्तं पदम् । सर्वहन्तेत्यर्थः ।

ii). ते गृहासो मधुश्चुतो **विश्वाहा**ऽस्मै शरणास्सन्त्वत्र; तिलवथ्सा ऊर्जमस्मै दुहाना **विश्वाहा** सन्त्वनप-स्फुरन्तीः (तै.आ. ४.७.१) । पदपाठे - पदद्वयं यद्वा आरण्यकशिक्षया स्वरस्य साधुत्वं पदपाठाभावात् न ज्ञातुं शक्यते ।

iii). तत्रा रथमुप शग्मं संदेम **विश्वाहा** वयं सुमनस्यमानाः (तै.सं. ४.६.६.३) । पदपाठे - विश्वाहेति विश्वा-अहा - समस्तं इङ्ग्यं पदम् ।

iv). सिञ्चामहा अवटमुद्रिणं वयं **विश्वाहा**ऽदस्तमक्षितम् (तै.सं. ४.२.५.५) । पदपाठे - विश्वा । अहा । इति व्यस्तं अनिङ्ग्यं पदद्वयम् ।

वेदवारिधिः प. रामानुजाचार्यः






pivstrust.org : pivstrust@gmail.com

# स्वरभेदहेतवः दृष्टान्तैः सह

2. **इन्द्राग्नी** इति पदस्य स्वरत्रययोगः -

i). तास्सृष्टा इंन्द्राग्नी अपांगूहताम् (तै.सं. २.२.१.१); पदपाठे - इन्द्राग्नी इतीँन्द्र-अग्नी ।

ii). उभा वांमिन्द्राग्नी आहुवध्यैँ (तै.सं. १.१.१४.१); पदपाठे - इन्द्राग्नी इतीँन्द्र-अग्नी ।

iii). इन्द्राँग्नी आ गंतम् (तै.सं. १.४.१५.१); - पदपाठे - इन्द्राग्नी इतीन्द्रं-अग्नी ।

3. एवं **द्यावापृथिवी**पदस्यापि -

i). इदं द्यांवापृथिवी भद्रमंभूत् (तै.सं. २.६.९.५); पदपाठे - द्यावापृथिवी इतिं द्यावा-पृथिवी ।

ii). अन्तस्ते दधामि द्यावांपृथिवी अन्तरुर्वन्तरिंक्षम् (तै.सं. १.४.३.१); पदपाठे - द्यावांपृथिवी इति द्यावाँ-पृथिवी ।

iii). इन्द्राँग्नी द्यावांपृथिवी आपं ओषधीः (तै.सं. १.२.१.२); - पदपाठे - द्यावांपृथिवी इति द्यावाँ-पृथिवी ।

4. **वाजयन्तःपदे** (स्वरानुगुणं व्यस्तं समस्तं वा पदम्)

i). अश्याम वाजंमभि वाजयंन्तोऽश्यामं द्युम्नं (तै.सं. १.३.१४.३); पदपाठे - वाजयंन्तः । व्यस्तं पदम् (क्यजन्तम्)

ii). त्वया वाजं वाजयन्तों जयेम (तै.सं. १.४.४६.३); वाजयन्तों हवामहे (तै. ब्रा. २.४.६.४); पदपाठे - वाजयन्त इतिं वाज-यन्तंः । इङ्ग्यम् समस्तं पदम् ।

वेदवारिधिः प. रामानुजाचार्यः




श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋच॒ः सामा॑नि॒ यजू॑ꣳषि । सा हि श्रीर॒मृता॑ स॒ताम् ।

पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)

pivstrust.org                    ✉: pivstrust@gmail.com


# स्वरैः वाक्यारम्भ, समाप्तिसूचनम्

तैत्तिरीयसंहितायां प्रायः 30000 तिङन्ताः सन्ति । तेषां परामर्शेन स्वरार्थसम्बन्धिविषयाः विशदं ज्ञायन्ते ।

**अनुदात्तं पदमेकवर्जम्** (अष्टा. 6.1.158) इत्यौत्सर्गिको नियमः । वाक्ये तु सर्वानुदात्तपदेषु पदस्य, पदात्, इत्यधिकारे सूत्रितैः, **अनुदात्तं सर्वमपादादौ** (अष्टा. 8-1-18), **तिङ्ङतिङः** (अष्टा. 8-1-28), **यद्वृत्तान्नित्यम्** (अष्टा. 8-1-166), **निपातैर्यद्यदिहन्त** .. इत्यादिभिः स्वरनिर्णयो भवति ।

तिङन्तानां सर्वानुदात्तत्वं औत्सर्गिकम्, यथा - परा॒ऽस्य॒ भ्रातृ॑व्यो भवति (तै.सं. ३.४.६.२) पदपाठे - भ॒व॒ति॒।

**पादादौ** - वेदा॒हमे॒तं पुरु॑षं म॒हान्त॓म् (तै.आ. ३.७.७);

**असि॑** य॒मो अस्या॑दि॒त्यो अर्व॑न्न॒सि॑, **आ॒हु॒**स्ते त्रीणि॑ दि॒वि बन्ध॑नानि (तै.सं. ४.६.७.१);

**अ॒श्याम॒** तं काम॑मग्ने, **अ॒श्याम॑** र॒यिं, **अ॒श्याम॒** वाज॑म॒भि, **अ॒श्याम॑** द्यु॒म्नम् (तै.सं. १.३.२६)

**तिङ्ङतिङः** - ता वि॑ष्णो **पाहि पा॒हि** य॒ज्ञम् (तै.सं. १.१.११.२) (प्रथमं - पाहि॒ ; द्वितीयं - पा॒हि) ;

सर्वं॑ पा॒प्मानं॑ **तरति॒ तर॑ति** ब्रह्मह॒त्यां (तै.सं. ५.३.१२.१-२); **अ॒दन्त्यदन्ति॑** (२.३.३२), **क॒ल्प॒न्ते॒ कल्प॑न्ते** (१.६.४३), **भ॒व॒ति॒ भव॑ति** (७.२.१६) ..

स्वेन॑ भाग॒धेये॒नोप॑**धावति॒ धाव॑ति** वाज॓म् (तै.सं. २.२.४.६);

**पिब॑न्तु॒ मद॑न्तु॒ वि॒यन्तु॒** सोम॓म् (तै.ब्रा. २.६.११.१०); तिङन्तत्रयम् ।

तस्मा॓द्यज्ञोपवी॒त्ये॑**वाधी॑यीत या॒जये॒द्यजे॑त** वा य॒ज्ञस्य॒ प्रसृ॑त्यै (तै.आ. २.१.१) - तिङन्तत्रयं ;

यस्मा॓द्भीषाऽ**वे॑पिष्ठाः प॒लायि॑ष्ठास्स॒मज्ञा॓स्थाः** (तै.ब्रा. ३.७.८.२) - तिङन्तत्रयं एकमुपसृष्टं ;

**यथ्स॒ञ्चर॑त्युप॒विश॑त्युत्तिष्ठ॑ते** च (तै.आ. ६.६४.१); - उपसृष्टं तिङन्तत्रयं ;

**आश्रा॑व॒यास्तु॒ श्रौष॒ड्यज॒ येयजा॑महे** वषट्का॒रः (तै.सं. १.६.११.२); - तिङन्तपञ्चकम् ?

वेदवारिधिः प. रामानुजाचार्यः





# तिङन्तस्वरभेदकाः सदृष्टान्ताः

**यद्वृत्तात्** - अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वत॑ः परि॒भू**रसि॑** (तै.सं. ४.१.११.१); असि॑ य॒मो अस्या॑दि॒त्यः (तै.सं. ४.६.३४)
*यस्य॑* समु॒द्रꣳ र॒सया॑ स॒हाऽऽहुः (तै. सं. ४.१.८.४-५) । (पदकाले **आ॒हुः**); अन्तोदात्तः (*यस्य* इत्यस्मात्)
अन्यत्र - ऋष॑य॒ एन॑साऽऽहुः (तै. सं. ३.२.८.१-२); - पदकाले **आ॒हुः** ; सर्वानुदात्तः (स्वाभाविकः)
प्राच्यां॓ दि॒शि त्वमि॑न्द्रासि॒ राजोतोदी॓च्यां वृत्रहन्वृ॒त्र॒हाऽसि॑ (तै. सं. २.४.१४.१); ।
पदपाठे - वृ॒त्र॒ह॒न्निति॑ वृत्र-ह॒न् । वृ॒त्र॒हेति॑ वृत्र-हा । अ॒सि॒ ॥
अत्र, स्वरसन्धेरनन्तरं विभिन्नपदच्छेदेऽपि समानं रूपं भवति । तत्र लक्षणैर्वा वेदाङ्गैर्वा क्वचित् भाष्यैर्वा निर्णयः कार्य स्यात् । अत्र क्रमपाठकाले वाक्यान्तवेष्टनज्ञानाय स्वरज्ञानम् अपेक्षितम् । वृ॒त्र॒हा + असि॑ = वृ॒त्र॒हाऽसि॑; वृ॒त्र॒हा + अ॒सि॒ = वृ॒त्र॒हाऽसि॑; **अ॒सीत्य॑सि** इति वा **असीत्यसि॑** इति वा वाक्यान्तवेष्टनं स्यात् ।
**निपातैर्यद्यदि...,  चवायोगे** .. - यदि॑ बि॒भी॒याद्दु॒श्चर्मा॑ भविष्या॒मीति॑ (पदपाठे - बि॒भी॒यात् - तै.सं. २.२.१०.३);
अव॑ चो॒क्षति॒ प्र च॑ किरति॒ शुद्ध्यै॓ (पदपाठे - उ॒क्षति॑ - तै.सं. ६.२.७.४);
हि प्राप्त्या - आपो॒ हि ष्ठा म॑यो॒भुव॑ः (तै.सं. ४.१.५.१); पदकाले - स्थ इति उदात्तं पदम् ।
दे॒वा ह्येत॒मैन्ध॑त (तै.सं. २.५.९.१); पदकाले - ऐन्ध॑त ।
इन्द्र॑वो वामु॒शन्ति॒ हि (तै.सं. १.४.४.१). पदकाले - उ॒शन्ति॑ । (यद्धितुपरं छन्दसि ८.१.५६)
दीर्घानुवाकेषु मध्ये वाक्यविरामाभाववत्सु ब्राह्मणभागे च वाक्यपरिमितिः स्वरैरेव कार्यः । कल्पसूत्रेषु मीमांसायां च अत्र साहाय्यं विधीयते ।

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com

(वेङ्कटेशस्य रामनाथस्य च प्रश्नः वैदिकश्रीगणे प्रस्तुतः)
तैत्तिरीयब्राह्मणे (काठके) 2.8.6,7

**प्रजापतिर्वै प्रजाकामस्तपोऽतप्यत । स हिरण्यमुदास्यत् । तदग्नौ प्रास्यत् । तदस्मै नाच्छंदयत् । तद्द्वितीयं प्रास्यत् । तदस्मै नैवाच्छंदयत् । तत्तृतीयं प्रास्यत् ॥ 47 ॥ तदस्मै नैवाच्छंदयत् । तदात्मन्नेव हृदय्येऽग्नौ वैश्वानरे प्रास्यत् । तदस्मा अच्छदयत् ।**

न + अच्छदयत् = नाच्छंदयत् । ✓ न + अच्छंदयत् = नाच्छंदयत् । ✗
एव + अच्छदयत् = एवाच्छंदयत् । ✓ एव + अच्छंदयत् = एवाच्छंदयत् । ✗
न + एव + अच्छदयत् = नैवाच्छंदयत् । ✓ न + एव + अच्छंदयत् = नैवाच्छंदयत् । ✗
तत् + अस्मै + अच्छदयत् = तदस्मा अच्छदयत् । ✓

न, एवशब्दौ द्वावपि उदात्तान्तौ, अस्मै - अनुदात्तः/प्रचयः

वेदवारिधिः प. रामानुजाचार्यः

(नावल्पाङ्कम् वासुदेवाचार्याणां दृष्टान्तान्तरेण समाधानाय प्रयत्नः - तत्र अनौचित्यम्)
तैत्तिरीयब्राह्मणे 2.7.14.2

प्र॒जाप॑तिः प॒शून॑सृजत । तेऽस्मात्सृ॒ष्टाः परा॑ञ्च आयन्न् । तान॑ग्निष्टो॒मेन॒ नाप्नो॑त् । ताने॒क्थ्ये॑न॒ नाप्नो॑त् । तान्थ्षो॑ड॒शिना॒ नाप्नो॑त् । तान्त्रा॒त्रिया॒ नाप्नो॑त् । तान्थ्स॒न्धिना॒ नाप्नो॑त् । सोऽग्निम॑ब्रवीत् । इ॒मान्म॑ ई॒प्सेति॑ । तान॒ग्निस्त्रि॒वृता॒ स्तोमे॑न॒ नाप्नो॑त् ॥46॥ स इन्द्र॑मब्रवीत् । इ॒मान्म॑ ई॒प्सेति॑ । तानिन्द्रः॑ पञ्चद॒शेन॒ स्तोमे॑न॒ नाप्नो॑त् । स विश्वा॑न्दे॒वान॑ब्रवीत् । इ॒मान्म॑ ई॒प्स॒तेति॑ । तान् विश्वे॑ दे॒वास्स॑प्तद॒शेन॒ स्तोमे॑न॒ नाप्नु॑वन्न् । स विष्णु॑मब्रवीत् । इ॒मान्म॑ ई॒प्सेति॑ । तान् विष्णु॑रेकवि॒ꣳ॒शेन॒ स्तोमे॑नाप्नोत् ।

न + आ॒प्नो॒त् = नाप्नो॑त् । ✓ न + आप्नो॒त् = नाप्नो॑त् । ✗

स्तोमे॑न + आ॒प्नो॒त् = स्तोमे॑नाप्नोत् । ✓

न – उदात्तः ; स्तोमे॑न - प्रचयान्तः

एकादेश उदात्तेनोदात्तः, उदात्तादनुदात्तस्य स्वरितः इत्याभ्यां सूत्राभ्याम् उक्तस्वरसिद्धिः ।

वेदवारिधिः प. रामानुजाचार्यः

(विश्वासस्य वासुकिजस्य प्रश्नः, उज्ज्वलराजपूतस्य उत्तरम्)

तैत्तिरीयब्राह्मणे 3.1.1.4

**पुन॑र्वसू न॒ः पुन॒रेता॒ँय्य॒ज्ञम् ।**

एताम् - आ + इताम् (आ उपसर्गः उदात्तः ।)

आ + इ॒ता॒म्॒ = एताम् । ✔

आ + इताम् = एताम् । ✘

अत्र सन्देहस्य बीजम् उदात्तवत् श्रूयमाणत्वम् (संहितोच्चारणकाले)
स्वरद्वैविध्येऽपि संहितोच्चारणे समानस्वरवत्त्वम् ।

*****

पदस्य, पदात्, अनुदात्तं सर्वमपादादौ, तिङ्ङतिङः, इत्यादिसूत्रैः वाक्यगततिङन्तानां स्वरः यद्वृत्त, पादादित्वादि निमित्तमन्तरा निघातः (सर्वानुदात्तः) एवेत्युत्सर्गः । अत्र विमृष्टपदेषु सर्वत्र निघात एव विद्यते ॥ परम्परायां संहिताव्यतिरिक्तभागस्य पदपाठाभावात् यद्यपि आद्युदात्तत्वाभावः न निश्चेतुं शक्य इत्युच्येत, तथापि भाष्यकारैरनुक्तत्वात्, प्रकरणसङ्गतेः, महर्षिणा पाणिनिना अनुशिष्टक्रमेण निघातस्य सम्भवाच्च पूर्वोक्त एव निर्णयः ॥

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org : pivstrust@gmail.com

# अन्ये दृष्टान्ताः

श्वेतो धावति, श्वा+इतो धावति, अलम्बुसानां याता, अलम् बुसानां याता । महाभाष्ये पस्पशाह्निके - 'वाक्यानि द्विष्ठानि भवन्ति । श्वेतो धावति, अलम्बुसानां याता' इत्युक्तम् । तत्र 'कः कीदृशो धावति' इति प्रश्ने 'श्वेतः' इत्युत्तरम् । 'श्वा इति' इति च्छेदेन 'कः ?' इत्यस्य उत्तरम् । 'श्वेतः' इति च्छेदेन 'कीदृशः ?' इत्यस्य उत्तरम् । एवं 'केषां जनपदानां गन्ता', 'को वा समर्थः' इति प्रश्नस्य उत्तरम् 'अलम्बुसानाम्' इति । अलम्बुसाः देशविशेषाः । 'अलम्बुसानां याता गन्ता', 'बुसानां सम्पदा पलालानां वा याता प्राप्तिमान् अलं समर्थः' इति च अर्थः । अत्र हि पदभेदेन स्वरभेदे कथं नाम व्यर्थकमेकं वाक्यं भवेत् ? तस्मात् अत्र एकश्रुतिरेव आश्रिता ॥

सुरभिमांसं भक्षयति, सुरभि मांसं भक्षयति, कृष्णकम्बलमानय, कृष्ण कम्बलमानय । कृष्णं कम्बलमानय । कृष्ण कम्बलमानय । वृद्धब्राह्मणमानय, वृद्धब्राह्मणमानय, ब्राह्मणग्रामं गच्छ, ब्राह्मण ग्रामं गच्छ, ब्राह्मणग्रामं गच्छ इत्यादौ स्वरभेदादर्थभेदः प्रतीयते ।

इन्द्रशत्रुः, इन्द्रशत्रुः ॥ इन्द्रस्य शत्रुः, इन्द्रः शत्रुः यस्य, शत्रुः- शातयिता, घातकः ।

यदब्रवीथ्स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत् (तै.सं. २.५.२.१) । यदब्रवीदिति ॥ इन्द्रस्य शत्रुर्वर्धस्व इति विवक्षन् अन्तोदात्तं इन्द्रशत्रुशब्दं आद्युदात्तम् उक्तवान् । ततः [शदेर्ण्यन्तात्] औणादिके क्रुन्प्रत्यये 'बहुलमन्यत्रापि' इति णिलुक् । उक्तश्च – 'यथेन्द्रशत्रुस्स्वरतोपराधात्' (पा.शि. ५२) इति ॥

स्थूलपृषती, स्थूलपृषती । स्थूलानि पृषन्ति यस्याः सा, स्थूला च सा पृषद्वती च ।

भाष्यकारः कथयति "असंदेहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति – स्थूलपृषतीम् आग्निवारुणीम् अनड्वाहीम् आलभेत इति । तस्यां सन्देहः - स्थूला चासौ पृषती च, स्थूलानि वा पृषन्ति यस्याः सा स्थूलपृषती इति । तां नावैयाकरणः स्वरतोऽवस्यति । यदि पूर्वपदप्रकृतिस्वरः ततो बहुव्रीहिः, अथ अन्तोदात्तत्वं ततस्तत्पुरुषः इति" इति ।

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org ✉: pivstrust@gmail.com

# वेदेषु पदानां स्वरतः नवधा विभागः (पाणिनिशिक्षा ४५)

**अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् । मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या॥**

भा.भा. पदशय्येति लुप्तबहुवचनं पदम् । पदशय्याः पदजातयो नव भवन्ति । ताः पुन कतमाः? अन्तोदात्तादयः । अन्ते उदात्तं यस्य तदन्तोदात्तम् । आदावुदात्तं यस्य तदाद्युदात्तम् । नीचपूर्वं स्वरितं नीचस्वरितम् । शाकपार्थिववदुत्तरपदलोपः । मध्ये उदात्तं यस्य तत् मध्योदात्तम् । द्वे उदात्ते यस्मिन् तत् द्व्युदात्तम् । त्रीणि उदात्तानि यस्मिन् तत् त्र्युदात्तम् ।

**अथोदाहरणम् । अग्निः । सोमः । प्र । वः । वीर्यम् । हविषाम् । स्वः । बृहस्पतिः । इन्द्राबृहस्पती ।**

**1) अ॒ग्निरित्यन्तोदात्तम् । 2) सोम॑ इत्याद्युदात्तम् । 3) प्र – इत्युदात्तम् । 4) व॒ः इत्यनुदात्तम् । 5) वी॒र्य॑म् – नीचस्वरितम् । 6) ह॒विषा॑म् - मध्योदात्तम् । 7) स्व॑ः - इति स्वरितम् । 8) बृह॒स्पति॑ः - इति द्व्युदात्तम् । 9) इन्द्रा॒बृह॒स्पती॑ - इति त्र्युदात्तम् ॥**

1) अग्निरिति ‘फिषोन्तः उदात्तः’ (फि.सू. 1) इति फिट्सूत्रेणान्तोदात्तः । अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत् । (तै.सं. 4.4.)

2) सोम इति – ‘ग्रामादीनां च’ इत्याद्युदात्तः । सोमो॑ऽददद्गन्ध॒र्वाय॑ । (तै.ए. 1.3)

3) प्र - इति निपातः । ‘निपाता आद्युदात्ताः’ () इति फिट्सूत्रेणोदात्तः । प्रार्प॑यतु । (तै.सं. 1.1.1)

वेदवारिधिः प. रामानुजाचार्यः

# वेदेषु पदानां स्वरतः नवधा विभागः पाणिनिशिक्षायाम्

4) **व॒ः** इत्यनुदात्तम् । "अनुदात्तं सर्वमपादादौ" () इत्यधिकारे 'बहुवचने तु वस्नसौ' () इति विधानात् अनुदात्तम् । प्र वो॒ वाजा॑ अ॒भिद्य॑वः । (तै.ब्रा. 3.5.2)

5) **वी॒र्य॑म्** – इति । 'तित् स्वरितमि' () ति स्वरितः । 'यतोऽनाव' () इत्याद्युदात्तस्तु न भवति । 'वीरवीर्यौ च' () ति सूत्रे वीर्यग्रहणादित्याहुः । भूरीदिन्द्र॑स्य वी॒र्य॑म् । ()

6) **ह॒विषा॑म्** - इति "नब्विषयस्यानिसन्तस्येति" () पर्युदासात् सुपश्चादनुदात्तत्वात्, मध्योदात्तम् । अग्ने यजस्व हविषा यजीयान् । (ऋ.सं. ) अत्र षष्ठ्यन्तमुदाहरणं मृग्यम् । (अथ॒ कस्मा॑द॒तेषा॑ꣳ ह॒विषा॒मिन्द्र॑मे॒व यं॑ज॒न्तीति॑ ।, ब्रह्म॑ य॒ज्ञाना॑ꣳ ह॒विषा॒माज्य॑स्य । तै.ब्रा. 1.5.11.3,4; 3.7.11.1)

7) **स्व॑ः** - इति न्यङ्स्वरौ स्वरिताविति फिट्सूत्रेण स्वरितम् । विभ्राजं ज्योतिषा स्वः । (न्यं॑ङ्ङग्निश्चे॑त॒व्या(३) - तै.सं. ५.५.१२)

8) **बृह॒स्पति॑ः** - इति 'उभे वनस्पत्यादिषु युगपदि' () ति द्व्युदात्तम् । बृह॒स्पति॑र्न॒ः परि॑पातु प॒श्चात् । (तै.ब्रा. 3.1.)

9) **इन्द्रा॒बृह॒स्पती॑** - इति द्वन्द्वः । इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती । 'देवताद्वन्द्वे च' () ति उभयपदप्रकृतिस्वरविधानात् त्र्युदात्तम् । तत्र इन्द्र इति, "वृषादीनां च" () त्याद्युदात्तम् । बृहस्पतिस्तु व्याख्यातः । इन्द्रा॒बृह॒स्पती॑ व॒यम् । () (इन्द्रश्च शुनासीरश्च इन्द्राशुनासीरौ । तदात्मकः इति विवक्षया संवत्सरः उच्यते । सं॒व॒थ्स॒रो वा इन्द्रा॒शुना॒सीर॑ः । तै.ब्रा. 1.7.1.1)

वेदवारिधिः प. रामानुजाचार्यः





# वेदानां संरचनात्मकाध्ययनस्य विषये

**ऋग्वेदपदपाठे कम्पाः - दीर्घकम्पाः**

1. **शचीइ३ऽपतिम्** । (1.106.6; 8.15.13); 2. वपुष्येइ३ इति । (1.160.2); 3. कक्ष्येइ३ इति । (1.173.6); 4. क्वोइ३ इति । (1.38.3); 5. **तनूइ३ऽनपातम्** । (10.92.2); 6. मनुष्येइ३ इति । (3.1.10); 7. **तनूइ३ऽनपात्** । (3.29.11; 9.5.2); 8. पातल्येइ३ इति । (3.53.17); 9. **शचीइ३ऽपतिः** । (4.30.17)

**ह्रस्वकम्पाः**

1. **स्वरि३रिति स्वः** । (1.129.2; … 22 वारम्) (ऋक्प्रातिशाख्यं 3.26 - जात्यवद्वा तथा वान्तौ तनू शचीति पूर्वयोः ।)

सामवेदे आर्चिके 464, 588, 630, 932, 1482 मन्त्राणां पदे स्वरिति पदस्य स्वरितत्वात् कम्पः पठ्यते पदपाठे ।

(Presentation to AICTE-IKS ppt – slide 85 onwards;
Śilpaśāstram ppt – slide 22 onwards)

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org ✉: pivstrust@gmail.com


# स्वरितभेदाः

- स्वरितः
  - स्वतन्त्रः
    - सन्धिजः
      - अभिनिहितः
      - क्षैप्रः
      - प्रश्लिष्टः
    - असन्धिजः
      - जात्यः
  - सामान्यः
    - पादवृत्तः
    - तैरोविरामकः
    - तैरोव्यञ्जनम्
    - ताथाभाव्यः
    - प्रातिहतः


वेदवारिधिः प. रामानुजाचार्यः

# कम्पभेदाः


- कम्पः
  - जात्यः
    - ह्रस्वः
      - उदात्तकम्पः
      - स्वरितकम्पः
    - दीर्घः
      - उ.क.
      - स्व.क.
  - क्षैप्रः
    - ह्रस्वः
      - उ.क.
      - स्व.क
    - दीर्घः
      - उ.क.
      - स्व.क
  - अभिनिहितः
    - दीर्घः
      - उ.क.
      - स्व.क
  - प्रश्लिष्टः
    - दीर्घः
      - उ.क.
      - स्व.क
  - ताथाभाव्यः
    - दीर्घः
      - उ.क.

वेदवारिधिः प. रामानुजाचार्यः

# कम्पभेदाः




चित्र सं. १





चित्र सं. २






# कम्पभेदाः




चित्र सं. ३





चित्र सं. ४


वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com


# कम्पभेदाः





चित्र सं. ५





चित्र सं. ६

वेदवारिधिः प. रामानुजाचार्यः

# कम्पभेदाः




चित्र सं. ७




चित्र सं. ८

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com


# यज्ञकर्मण्यजपन्यूङ्खसामसु (पा.सू. 1.2.34)

**काशिका** - त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते । तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते । जपन्यूङ्खसामानि वर्जयित्वा यज्ञकर्मणि मन्त्राणामैकश्रुत्यं भवति । अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतो३म् (ऋ० ८.४४.१६) । यज्ञकर्मणीति किम्? संपाठे मा भूत् (संपाठः - स्वाध्यायकालः इति न्यासः) । अजपेष्विति किम्? ममाग्ने वर्चो विहवेष्वस्तु (ऋ० १०.१२८.१) । जपोऽनुकरणमन्त्रः, उपांशुप्रयोगः । अन्यूङ्खेष्विति किम्? न्यूङ्खा ओकाराः । षोडश (द्र० - आश्व०श्रौ०उत्तरार्द्ध १.११) । तेषु केचिदुदात्ताः केचिदनुदात्ताः । असामस्विति किम्? ए३ विश्वं समत्रिणं दह३ (जै०सं० ४.८.६) । सामानि वाक्यविशेषस्था गीतय उच्यन्ते । तत्रैकश्रुतिर्न भवति ॥

**सिद्धान्तकौमुदी** - यज्ञक्रियायां मन्त्र एकश्रुतिः स्याज्जपादीन्वर्जयित्वा । अग्निर्मूधा (अग्निर्मूर्धा) । दिवः ककुत् (दिवः ककुत्) । यज्ञेति किम् । स्वाध्यायकाले त्रैस्वर्यमेव । अजपेति किम् । ममाग्ने वर्चो विहवेष्वस्तु (ममाग्ने वर्चो विहवेष्वस्तु) । जपो नाम उपांशुप्रयोगः । यथा जले निमग्नस्य । न्यूङ्खा नाम षोडश ओकाराः । गीतिषु सामाख्या ।

वेदवारिधिः प. रामानुजाचार्यः

# पत्रम्

## 4. वेदभाष्याणि, तेषां प्रमेयविषयाश्च





pivstrust.org ✉: pivstrust@gmail.com

# ऋग्वेदभाष्यकाराः

1. **स्कन्दस्वामी** (1,2,3 मिलित्वा एकं भाष्यं निर्ममिरे)
2. **नारायणः**
3. **उद्गीथः**
4. **हस्तामलकः**
5. **वेङ्कटमाधवः** – सङ्क्षिप्तं, पूर्णं
6. **लक्ष्मणः**
7. **धानुष्कयज्वा**
8. **आनन्दतीर्थः** (40 सूक्तानि - विष्णुपरत्वेन)
    1. जयतीर्थः
    2. नरसिंहः
    3. राघवेन्द्रयतयः
    4. नारायणः
9. **आत्मानन्दः**
10. **सायणः** – अधियज्ञव्याख्या, प्रथममण्डलस्य व्याकरणप्रक्रिया च
11. **रावणः**
12. **मुद्गलः**
13. **चतुर्वेदस्वामी**
14. **देवस्वामी**
15. **(भट्टभास्करः)**
16. **उवटः**
17. **हरदत्तः**
18. **दयानन्दसरस्वती** (7 मण्डलानि, भाषायां च)
19. **कपालिशास्त्री** (अरविन्दमार्गः, प्रथमाष्टकस्य)
20. **डॉ. ऐन्.ऐस्. अनन्तरङ्गाचार्याः** (आध्यात्मिकविवरणं 175 मन्त्राणाम्)
21. **श्रीरङ्गनाथशर्मा** (रङ्गन् जी) समग्रम्, आध्यात्मिकदृष्ट्या

वेदवारिधिः प. रामानुजाचार्यः

# शुक्लयजुर्वेद-माध्यन्दिनशाखा-भाष्यकाराः

1. शौनकः
2. हरिस्वामी
3. उवटः
4. गौरधरः
5. रावणः
6. महीधरः
7. दयानन्दसरस्वती

वेदवारिधिः प. रामानुजाचार्यः

# शुक्लयजुर्वेद-काण्वशाखा-भाष्यकाराः

1. सायणः
2. आनन्दबोधः
3. अनन्ताचार्यः
4. कालनाथः
5. मुरारिमिश्रः
6. हलायुधः
7. आदित्यदर्शनः
8. देवपालः
9. सोमानन्दपुत्रः

# कृष्णयजुर्वेद-तैत्तिरीयशाखा-भाष्यकाराः

1. कुण्डिनः
2. भवस्वामी
3. गुहदेवः
4. कौशिकभट्टभास्करमिश्रः
5. क्षुरः
6. सायणः
7. वेङ्कटेशः
8. बालकृष्णः
9. हरदत्तमिश्रः
10. शत्रुघ्नः

वेदवारिधिः प. रामानुजाचार्यः

## सामवेद-भाष्यकाराः

1. माधवः
2. भरतस्वामी
3. सायणः
4. सूर्यदैवज्ञः
5. महास्वामी
6. शोभाकरभट्टः
7. गुणविष्णुः

## अथर्ववेद-भाष्यकाराः

1. सायणः

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com

# वेदार्थज्ञानविषये - कृतयः

संहितारूपेण (छन्दोयुक्ताः) महर्षिभिः दृष्टाः वेदाः

अर्थस्वरूपावगतिः विश्लेषणं च पदपाठेन

संहितानियमादिज्ञानाय क्रमपाठः

विशिष्टांशानां दृष्टान्तबाहुल्येन ज्ञातुं विकृतिपाठाश्च प्रथन्ते ।

सन्देहनिरास, आनुपूर्वीसंरक्षण, विवेचनादिभ्यः उपकुर्वते ।

लक्षणग्रन्थाः, व्याख्यानानि (अङ्गोपाङ्गशास्त्रैः), भाष्याणि च

विमर्शपुरस्सरं विभिन्नप्रकारकम् अर्थज्ञानं प्रापयन्ति ।

वेदवारिधिः प. रामानुजाचार्यः





# अथर्ववेदवैशिष्ट्यम्

स वा एष त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः संस्क्रियते ।

मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति ॥ (गो.ब्रा. ३।२)

अथर्वाङ्गिरसां विषये -

आंगिरसे कल्पे षट्कर्माणि सविस्तरम् ।

अभिचार-विधानेन निर्दिष्टानि स्वयंभुवा ॥

न्यायमञ्जर्याम् - अथर्ववेदस्य आद्यवेदत्वम् उक्तम् ।

रघुवंशे, स बभूव दुरासदः परैर्गुरुणाऽथर्वविदा कृतक्रियः (८।३)

वेदवारिधिः प. रामानुजाचार्यः

# विभिन्नप्रकारकवेदभाष्याणि

अधियज्ञ, अधिदैव, अध्यात्मपक्षाः मन्त्रार्थविवरणे प्रसिध्यन्ति । एषां परस्परं पूरकत्वमेव, नतु विरोधः । वेदेषु अग्निशब्दः भौतिकस्तरे पञ्चभूतेष्वन्यतमः, अधिदैवस्तरे देवेषु अन्यतमः, देवदूतः हविःप्रापकश्च, (हव्यवाहनो देवानां, कव्यवाहनः पितृणां, सहरक्षा असुराणाम्), अध्यात्मस्तरे 'साक्षादप्यविरोधं जैमिनिः' इति ब्रह्मसूत्रानुसारेण अग्रं नयति इति व्युत्पत्त्या परमात्मवाचकः इत्यादिप्रकारेण वेदानां त्रयी इति स्तरत्रये अर्थबोधकत्वात् तद्विवरणमपि तैस्तैः विभिन्नस्तरेषु भाष्ये प्रतिपादिताः । सायणभाष्यस्य वेदभाष्यं तावत् अधियज्ञप्राधानं, कल्पसूत्र, मीमांसादिविचारपुरस्सरं याज्ञिकविनियोगविषये निर्भरं दृश्यते । एवं आध्यात्मविषयकविवरणं बहूनां ऋङ्मन्त्राणां श्रीमद्भिः डॉ. ऐन्.ऐस्, अनन्तरङ्गाचार्यैः कृतं, मन्त्राणां तात्पर्यं ब्रह्मविषयकमिति प्रतिपादयति । एवं वेङ्कटमाधवस्य पूर्णं ऋग्वेदीयं भाष्यं सङ्क्षिप्तं विद्यते । परन्तु तत्रत्यवैशिष्ट्ये .... । गुणविष्णुभाष्यं च ... । श्रीमद्भिः कपालिशास्त्रिभिः ऋग्वेदप्रथमाष्टकस्य संस्कृतव्याख्या ... । श्रीमतां डॉ. रङ्गन् जी महाभागानां समीपकाले प्रकाशितं भाष्यं आध्यात्मिकस्तरे ध्वनिदीपिकानामकम् ... ।

वेदवारिधिः प. रामानुजाचार्यः

# वेङ्कटमाधवीयम् (वेङ्कटमाधव-भाष्यम्)

श्रीवेङ्कटार्यतनयो व्याचिकीर्षति माधवः । ऋक्संहितामस्य देवः प्रसीदतु विनायकः ॥ १ ॥

लोकसिद्धं विभक्त्यर्थमनुक्ते तत्र न त्यजेत् । निरुक्तमग्रतः कुर्याद् यावत्प्राणं तथा स्वरम् ॥ २ ॥

पदानि पूर्वं जानीयात् पदस्वरमनन्तरम् । उपसर्गान् क्रियाशब्दैः संयोज्यार्थं प्रदर्शयेत् ॥ ३ ॥

निघाततिङ्पदस्यार्थे वाक्यार्थः पर्यवस्यति । अनिघातोऽपि पादादौ विशेषस्तत्र वक्ष्यते ॥ ४ ॥

निघाततिङ्पदस्यार्थं वाक्यान्ते दर्शयेच्छनैः । उदात्ततिङ्पदस्यार्थमुच्चैरादौ प्रदर्शयेत् ॥ ५ ॥

यद्यदीत्यादिभिर्युक्तं तिङर्थं च स्फुटं वदेत् । अवान्तराणां वाक्यानामन्तेऽर्थं तं च दर्शयेत् ॥ ६ ॥

अथात्र कारणं ब्रूहि वाक्यादौ तिङुदात्तवत् । सर्वानुदात्तमन्यत्र नार्थभेदस्तु कश्चन ॥ ७ ॥

अर्थभेदादिति ब्रूमः श्रोतारमिह तिङ्पदम् । उदात्तवत् समाहन्ति स यथाऽभिमुखो भवेत् ॥ ८ ॥

उदात्तकारकपदैस्तत्र पूर्वं समाहते । पदं सर्वानुदात्तं स्यान्मध्येऽन्ते वाऽथ यद्भवेत् ॥ ९ ॥

अनुपादं विरम्यार्थमृषयः कथयन्त्यतः । पुनश्चोद्बोधनं कर्तुं पादादौ तिङुदात्तवत् ॥ १० ॥

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org ✉: pivstrust@gmail.com



# वेङ्कटमाधवीयम् (वेङ्कटमाधव-भाष्यम्)

अनुदात्ते पदे यत्र तत्र संस्थापयेद् द्विधा । 'वायु॒विन्द्र॑श्च चेतथः', 'तावा या॑त॒मुप॑ द्र॒वत् ॥ ११ ॥

भगवान् पाणिनिर्वेत्ति वाक्यवृत्तीः समञ्जसम् । प्रतिषेधो निघातस्य बोद्धव्यो विहितैरतः ॥ १२ ॥

तत्र सम्बोधनपदैर्नरः सम्बोधितोऽपि सन् । वाक्यार्थोद्बोधनं कर्तुं पुनराहन्यते तिङा ॥ १३ ॥

अनु(ननू)दात्तं पदं दृष्टं वाक्यमध्येऽपि तद्यथा । 'मा न॒ः शंसो॒ अर॑रुषः', 'इन्द्र॒ सोमं॒ पिबे॑'ति च ॥ १४ ॥

तत्र ब्रूमोऽर्थसंस्थानमिह यस्मिन् भवेत् तिङि । तन्न (तत्तु) सर्वानुदात्तं स्यादसंस्थित उदात्तवत् ॥ १५ ॥

मा प्राप्नोतु कदर्यस्य शंसोऽस्मान् ब्रह्मणस्पते! । रक्षैवमिति मन्त्रार्थः पाने चावेशनं फलम् ॥ १६ ॥

लुडर्थे ननु वाक्यार्थः स्पष्टं सन्तिष्ठते तव । सत्यमाह भवानेतत् काकुस्तत्र तु विद्यते ॥ १७ ॥

यथा तिङ्क्षु हि-युक्तेषु ह्यर्थे वाक्यस्य संस्थितिः । एवं लुट्यपि संस्थानं तस्मिन् काकाविति स्थितिः ॥ १८ ॥

'परा॒ हि मे॒ विम॑न्यवः', 'आ हि ष्मा॑ सू॒नवे॑ पि॒ता' । 'न॒हि वा॒मस्ति॑ दूर॒के', 'आ॒य॒जी वा॑ज॒सात॑मा' ॥ १९ ॥

आश्चर्य एषु मन्त्रेषु तिङर्थः पर्यवस्यति । हेतौ 'सं यन्मदा॑ये'ति तेष्वतस्तिङुदात्तवत् ॥ २० ॥

वेदवारिधिः प. रामानुजाचार्यः



# वेङ्कटमाधवीयम् (वेङ्कटमाधव-भाष्यम्)

एवं येनेह युक्तं सत् तिङन्तं न निहन्यते । तदर्थे तत्र संस्थानं न तिङर्थ इति स्थितिः ॥ २१ ॥

एवं पदे समासे च यत्रोदात्तो व्यवस्थितः । वर्णे पदे वा तत्रापि काकुरस्तीति निश्चयः ॥ २२ ॥

तत्रैकस्मिन् पदे काकुर्देवैरेवावगम्यते । सूक्ष्मविद्भिः समासस्थः प्राकृतैरपि तिङ्स्वरः ॥ २३ ॥

म्लेच्छन ..... .... व्यचर्तृषु (हर्तृषु) । वाक्यवृत्तिप्रकारोऽयं सदृशो लौकिकेष्वपि ॥ २४ ॥

मन्यन्ते पण्डितास्त्वन्ये यथाव्याकरणं स्वरम् । व्यवस्थितो व्यवस्थायां हेतुः तत्र (कश्चित्) न विद्यते ॥ २५ ॥

माधवस्य त्वयं पक्षः स्वरेणैव व्यवस्थितिः । अन्यम् अर्थमभीप्सत् .......... ॥ २६ ॥

अग्निमीळे -

अर्थज्ञानमृषिज्ञानं भूयिष्ठमुपकारकम् । वक्ष्यन्त ऋषयस्तस्मात् स्वरूपस्थास्तु देवताः ॥ २७ ॥

पादावसानविज्ञानं छन्दोज्ञानेन सिध्यति । पारुच्छेपादिषु ज्ञेयमतश्छन्दश्च यत्नतः ॥ २८ ॥

विनियोगपरिज्ञानाद् यजुषामर्थनिश्चयः । इतिहासैर्ऋगर्थानां बहुब्राह्मणदर्शितैः ॥ २९ ॥

उपक्रमेषु सूक्तानामुद्युक्त इव दृश्यते । संहरन्निव चान्तेषु सूक्तं ज्ञेयमतो बुधैः ॥ ३० ॥

वेदवारिधिः प. रामानुजाचार्यः

# सामवेदभाष्यकारः गुणविष्णुः

छान्दोग्यमन्त्रब्राह्मणभाष्यं गुणविष्णुकृतम् । एषः सायणादपि प्राचीनः द्वादशशताब्दीयः इत्युन्नीयते । आहत्य २६८ मन्त्राः गोभिलखादिरगृह्यसूत्रोक्तविनियोगाः कौथुमशाखिनां सामगानां कृते उपयुक्ताः अत्र व्याख्याताः । व्याख्याद्वयमनेन कृतम्, तयोः विषये विवरणे भेदश्चास्ति । वङ्गदेशीय एष इति प्रथा, तत्र तस्य ख्यातिश्च । बहूनां पदानां व्याख्याने निघण्टु-निरुक्ततः विवृणोति । सन्देहास्पदस्थलेषु मीमांसान्यायान् उदाहृत्य निश्चिनोति । ब्राह्मणोपनिषदः, गृह्य-धर्मसूत्राणि च बहुत्र उदाहरति । व्याकरणविचारेषु पाणिनिसूत्राणि बहुशः उदाहरति, कुत्रचित् काशिकां ऋक्प्रातिशाख्यं चेति पाण्डित्यमस्य बहुमुखं दृश्यते । बहुशाखामन्त्रवित्त्वं चास्य क्वचित् प्रचलितपाठादन्यस्य ग्रहणादुन्नीयते । (छा.ब्रा. १.३.११) इत्यत्र सुकृतं (सुष्ठु कल्पितम्) इति पाठं स्वीकरोति परं ऋग्वेदे तु सुवृतम् इति पाठः इत्यपि निर्दिशति । एवं (छा.ब्रा. १.५.३) इत्यत्र शतदायमुख्यम् इत्यानुपूर्वीं स्वीकरोति परम् ऋग्वेदे (२.३२.४) तु पाठः शतदायमुक्थ्यम् इति । यास्केन (११.३१) चैतत् पदं निरुक्तं वक्तव्यप्रशंसं प्रख्यातस्तुतिम् इत्यर्थः इति ।

वेदवारिधिः प. रामानुजाचार्यः





# श्रीमतां कपालिशास्त्रिणाम् ऋग्वेदप्रथमाष्टकस्य संस्कृतव्याख्या

ऋग्भाष्यभूमिका - प्रथमः खण्डः

जयति श्रीजुषामेको भुवनानामधीश्वरः । पुरुषाणामशेषाणामात्मा यस्तमसः परः ॥ १ ॥
जयत्युत्तमशब्दार्थः शब्दमूर्तिधरः पुमान् । निःश्वासेन सृजन् विश्वं प्राणवान् तपसा प्रभुः ॥ २ ॥
तदृचां जयति व्योम स्थानं परममक्षरम् । यतो विसृष्टं भुवनं सार्थकं परमेष्ठिना ॥ ३ ॥
वरेण्यं वरणीयानां वेदगुप्तार्थवेदिनाम् । भावं भावं महाभागमरविन्दपदं महः ॥ ४ ॥
तत्सम्मतमसम्बाधमबोधैः कर्मबन्धनैः । कुर्मो गूढार्थबोधाय वेदमर्मविभेदनम् ॥ ५ ॥
वेदानां ऋग्यजुःसाम्नां साङ्गानां विवृतिः क्वचित् । कृता पूर्वैः पुराणानां गाथाभिरुपबृंहिता ॥ ६ ॥
धर्मानाहुर्वेदमूलान् सामयाचारिकानपि । तदेव मतमेकेषां प्राचामाचारशासि(लि?)नाम् ॥ ७ ॥
दिव्यज्ञानतपोनिष्ठानिधीन् वेदान् विदुर्बुधाः । एके क्रियाकलापानामालवालं प्रचक्षते ॥ ८ ॥
तदत्र समयाचार्याः सर्वे भारतभूजुषः । काण्डद्वयात्मकं वेदं धर्ममूलं च मेनिरे ॥ ९ ॥
आधारः कर्मणां काण्डं पूर्वं ज्ञानस्य तूत्तरम् । कीर्त्यते पूर्वतन्त्रस्य ब्राह्मणान्युपजीवनम् ॥ तथोपनिषदो मूलं परज्ञानस्य चक्षते ॥ १० ॥
ऋचो यजूंषि वा मन्त्राः प्रयोगसमवायिनः । क्रियासु विनियोगार्था यागार्था इति निर्णयः । तस्मादङ्गत्वमापन्ना मन्त्राः कर्मसु निश्चिताः ॥ ११ ॥
प्रसादनाय देवानामन्तरङ्गस्य शुद्धये । इष्टप्राप्तेरनिष्टस्य निवृत्तेरपि सिद्धये ॥ १२ ॥
जपादिषु प्रयुज्यन्ते पावना इति यद्यपि । तथाऽपि कर्म परमं मन्त्रास्तस्योपसर्जनम् ॥ १३ ॥
मन्त्रब्राह्मणयोस्तस्माद् वेदाख्या धर्मशास्त्रतः । सूत्रकारैः समाख्याता कर्मधर्मपरैः पुरा ॥ १४ ॥
एतादृशं पुरस्कृत्य समयं साम्प्रदायिकम् । व्याख्यानं वेदमन्त्राणामकार्षुर्भागशः क्वचित् ॥ १५ ॥
याजुषाणां तु मन्त्राणामुव्वटश्च महीधरः । ऋचामन्ये तथा स्कन्दस्वामी वेङ्कटमाधवः ॥ १६ ॥
सब्राह्मणानां सम्पूर्णाः संहितानां सविस्तरम् । व्याख्याश्चतसृणां चक्रे सुधीः सायणमाधवः ॥ १७ ॥

वेदवारिधिः प. रामानुजाचार्यः

# श्रीमतां कपालिशास्त्रिणाम् ऋग्वेदप्रथमाष्टकस्य संस्कृतव्याख्या

यस्यैव भाष्यं सर्वत्र प्राप्तप्रसरणं परम् । बुधैराद्रियते प्राच्यैरपि पाश्चात्यपण्डितैः ॥ १८ ॥
नव्याः पश्चिमभूखण्डे वेदबाह्या अपि स्वयम् । नवाभ्युदयसम्पन्नाः सर्वतो ज्ञानमीप्सवः ॥ १९ ॥
कौतुकाद् भारतीयानां विमृशन्तः पुराकथाः । प्राच्यपाण्डित्यसाहाय्याद् वेदान् केचन लेभिरे । यथाप्रतीच्यसंस्कारं चक्रुर्वेदार्थनिर्णयम् ॥२०॥
सायणोऽभवदेतेषां सुमहानुपकारकः । समादृत्याशयान् तस्य स्वेषां यावदपेक्षितम् ॥ २१ ॥
एते वेदोक्तदेवानां मन्त्राणामपि सर्वशः । निरणैषुः स्वरूपाणि तथा मन्त्रदृशां मतम् ॥ २२ ॥
प्राप्तं परिश्रमादेषां वैदुष्यस्याविशेषतः । समासेनोच्यते ज्ञेयमेतन्नव्यविचारिणाम् ॥ २३ ॥
एक एव परो वेदः स ऋग्वेदः पुरातनः । ऋषयो मन्त्रकाव्यस्य कर्तारः कवयः स्मृताः ॥ २४ ॥
सूक्तात्मकानि काव्यानि न्यबध्नन् यज्ञकर्मणे । मरुत्पर्जन्यभूताग्नि-भानवोऽन्याश्च देवताः ॥ २५ ॥
ऋषिभिः प्राकृतैर्भीत्या प्रायः प्रीत्या च सन्नुताः । निसर्गसिद्धा अन्येऽपि भूतात्मानो जडा अपि । देवाः प्रकल्पिताश्चान्ये स्तूयन्ते चेतना इव ॥२६॥
रागिभिर्द्वेषिभिः पूर्वैः प्राकृतैरेव मानुषैः । देवा अभिष्टुताः सूक्तैर्नानाभीष्टार्थसिद्धये ॥ २७ ॥
यज्ञकर्मकलापेषु चीयमानेषु कालतः । यजुषामपि मन्त्राणां ब्राह्मणानां च कल्पना ॥ अयमूहाच्च भूतार्थः ऋग्भ्योऽर्वाक्कालभाषया ॥२८॥
अतीन्द्रियार्थविज्ञानम् आत्मज्ञानमथापि वा । यदि सूक्तेषु दृश्येत तदकिञ्चित्करं भवेत् ॥ २९ ॥
दशमे मण्डले ज्ञानप्रशंसा दृश्यते स्फुटम् ।भवत्यन्यत्र वेदे चेत्तदर्वाचीनसम्भवम् ।इदं तु सर्वथा ज्ञेयम् ऋषयः प्राकृता जनाः ॥३०॥
ज्ञानस्यारण्यकग्रन्थाः शरणं न तु संहिताः । तस्मान्मन्त्रेषु न ज्ञानं न रहस्यं न वा तपः ॥ ३१ ॥
जडानां भूततन्मात्रदेवानां वा नभस्सदाम् । सृष्टानाम् ऋषिभिः सोम-मदवैभवतोऽपि वा ॥ ३२ ॥
अदृश्यानां च दृश्यानाम् असतां वा सतामिव । स्तुतयः परिदृश्यन्ते प्रणीतास्तु पृथग्जनैः ॥ ३३ ॥
एतादृशैरभिप्रायैः पाश्चात्येभ्यः समाहृतैः । आक्रान्ता बहवोऽस्मासु बुद्धिमन्तोऽपि भारते ॥ ३४ ॥

वेदवारिधिः प. रामानुजाचार्यः

# श्रीमतां कपालिशास्त्रिणाम् ऋग्वेदप्रथमाष्टकस्य संस्कृतव्याख्या

अनुयान्ति नवं मार्गं नव्यविद्यावशंगताः । *अविमर्शनपाण्डित्यैः प्राचीनैरपि नादृताः ॥३५॥
(* प्रायदर्शनाभिप्रायेणेदमुक्तम्, सन्ति तु विरलाः प्राचीनपण्डिताः विमर्शरसिकाः ॥)
एवं स्थितेऽत्र भगवान् अरविन्दो विदां वरः । अप्रतीक्षितमध्वानम् अपश्यत् तपसि स्थितः ॥ ३६ ॥
प्रकाशमभवत्तस्य रहस्यं वेदगूहितम् । मन्त्रार्थमार्गणायास्य न कदाऽप्यभवन्मतिः ॥ ३७॥
तथाऽपि योगनिष्ठायां तिष्ठतोऽन्तरचक्षुषः । प्रत्यक्षतां गताः ख्याता वेदे काश्चन देवताः ॥ ३८ ॥
तदाप्रभृति वेदार्थविचारेऽभिरुचिः स्थिता । वेदे रहस्यं विज्ञाय किञ्चिद्वा ज्ञापयन्मुनिः ॥ ३९ ॥
ऋचाम् ऋषीणां देवानां तत्त्वानि गहनान्यपि । यथादृष्टं समाचख्यौ जिज्ञासूनां प्रबुद्धये ॥ ४० ॥
दर्शनान्मतिमुत्पन्नां निर्विकल्पां महामनाः । प्रत्यायनार्थमन्येषां युक्तिभिः प्रत्यपादयत् ॥ ४१ ॥
तद्दर्शनमुपाश्रित्य तदुक्तीः परिभाव्य च । ऐतिह्यमपि चावेक्ष्य सम्प्रदायान् पुरातनान् ॥ ४३ ॥
अपि प्राचीनतन्त्राणां सुदूरपरिशीलनैः । रहस्यं वेदभाषायां भिद्यतेऽत्र चिरन्तनम् ॥ ४४ ॥
ब्राह्मणेष्वपि मन्त्रेषु तथा चोपनिषत्स्वपि । नैरुक्तेष्वपि वाक्येषु प्राक्तनेष्वितरेष्वपि ॥ ४५ ॥
पुराणेष्वितिहासेषु तथा शास्त्रान्तरेष्वपि । वेदे रहस्यमस्तीति भावः सर्वत्र दृश्यते ॥ ४६ ॥
ऋक्संहितायां तत्रादौ गोप्यं द्रष्टव्यमुल्बणम् । तत्तु भाषाविशेषेण सङ्केतात्मतया स्थितम् ॥ सङ्केतार्थे तु विज्ञाते गच्छेद् गोप्यं प्रकाशताम् ॥ ४७ ॥
ऋषिदृष्टि(ष्टे?)षु मन्त्रेषु तस्योद्घाटनसाधनम् । अस्ति चेच्चक्षुरस्माकं लभ्यते निर्विकल्पतः ॥ ४८ ॥
निरूपिते तद्रहस्ये मन्त्रान् मन्त्रदृशः प्रति । पलायिता स्याद्दुर्भ्रान्तिरधिकृत्यापि देवताः ॥ ४९ ॥
यच्चिरन्तनमार्षं च तदस्मन्मतमिष्यते । मन्त्रो मूलं ततः शाखा ब्राह्मणोपनिषत्ततिः ॥ ५० ॥
मधुच्छन्दःप्रभृतयः सूरयो मन्त्रदर्शिनः । येषां चक्षुष्मतां प्राचां देवाः प्रत्यक्षतां गताः ॥ ५१ ॥

वेदवारिधिः प. रामानुजाचार्यः

# श्रीमतां कपालिशास्त्रिणाम् ऋग्वेदप्रथमाष्टकस्य संस्कृतव्याख्या

न पाण्डित्यप्रकर्षेण चमत्कारेण वा गिराम् । काव्यशोभारता एते सूक्तकाव्यानि निर्ममुः ॥५२॥
अन्तरद्भुतशक्तीनां समुल्लासादनर्गलम् । सम्प्रसादाच्च देवानां श्रवणादीक्षणादपि ॥ मन्त्राह्वयं स्वयं ब्रह्म साक्षाच्चक्रुर्महर्षयः ॥५३॥
श्रुत्या च दृष्टिसम्पत्त्या दिव्यया वाऽथ सूक्ष्मया । सिद्धया देवताभक्त्या मन्त्रान् प्रापुस्तपोधनाः ॥५४॥
तस्मादेतानि सूक्तानि गीयन्ते मन्त्रदृष्टयः । अन्तर्दर्शनसम्पन्ना ऋषयः कवयः श्रुताः ॥५५॥
देवास्तु बहवः स्तुत्याः पृथङ्नामानि बिभ्रतः । एक एव परो देवः सूर्यात्मा परमः पुमान् ॥ यस्यैव बहुधावृत्तिर्नानादेवात्मतास्थितिः ॥५६॥
सत्यं बहूनि नामानि परस्यैकस्य देवताः । शक्तयो मूर्तयोऽप्येता नामान्येव न केवलम् ॥ तस्मादेकः परो नानामूर्तिनामस्वरूपभृत् ॥५७॥
पृथक्त्वेऽप्यपृथग्भूतं देवताभ्यः परं महः । मुखतो देवताभेदः पृष्ठतः सर्वदेवताः ॥५८॥
एकैकोऽपि ततो देवो व्यापारस्य विशेषतः । पृथङ्मूर्तः पृथङ्नामा सर्वदेवमयः परः ॥५९॥
भवत्यङ्गिन एकस्य बहून्यङ्गानि वा यथा । भिन्नप्रवृत्तयो देवाः परस्य ज्योतिषस्तथा ॥६०॥
सन्नुता ऋषिभिस्तस्मात् पृथक्छन्दसि देवताः । न केवलं नामभिदा व्यक्तिवृत्तिभिदा अपि ॥ विज्ञेयाः परमस्यैता एकस्यैवेह देवताः ॥६१॥
आभ्यन्तरे वा बाह्ये वा विश्वस्मिन् बहुभूमिके । नियुक्ता अधिकारेषु बहवो लोकपालकाः ॥६२॥
अधीनं देवतास्वेव जगदन्तर्बहिस्तथा । इदं रहस्यं विदितं पूर्वेषां मन्त्रदर्शिनाम् ॥६३॥
तस्मात्प्राणेन मनसा गात्रेणापि महर्षयः । सर्वात्मना च यजनं देवेभ्यो निरवर्तयन् ॥६४॥
अन्तर्यागसमर्थानां विरलानां महात्मनाम् । गोप्यान्यप्रभवो वेत्तुं पामरास्तु सहस्रशः ॥६५॥
देवान् बाह्येन यागेनाराधयन् मन्त्रपूर्वकम् । मन्त्रस्तु भाषाविच्छित्या द्विधाऽप्यभवदर्पकम् ॥६६॥
ऋषिदृष्टस्य मन्त्रस्य देवस्याराधितस्य च । यज्ञस्य यजमानस्य होत्रादेश्च फलस्य च । स्वरूपं पुरतः स्पष्टं विचारेऽत्र भविष्यति ॥६७॥

वेदवारिधिः प. रामानुजाचार्यः





# कपालिशास्त्रिव्याख्यावैशिष्ट्यसारः

**वेदगूढार्थवादे सारतस्त्रयः** किल **दोषा उद्भाविताः** । तदत्र क्रमश इमान् निर्धूलितान् विधाय एकैकशः सारांशग्राहं निस्सारयिष्यामः ॥

**तत्राद्यः** पाश्चात्येतिहासविदां निर्णयः अस्मदीय-वेदगुप्तार्थ-सिद्धान्तस्य प्रत्यर्थीति ।

यदि च श्रीमदरविन्दचरणैः प्रदर्शितमध्वानं प्रविशेम, द्वेधा भवति लाभ इति ध्रुवम् । मन्त्रेष्वारोपितानि अनुपपत्तिप्रचुराणि प्रलपितानि पलायितानि स्युः । दुरवगाहानि दुर्निर्णेयानि बहूनि स्थलानि मन्त्रेषु सुगमानि भवेयुः । अयमन्वयतो लाभः, व्यतिरेकतस्तु अयम् । मन्त्रदर्शिनामध्यात्मसमुन्नतिः, सूक्तमन्त्रेषु निक्षिप्तं गहनं तत्त्वं देवतानां स्वरूपं, इत्यादीन्यधिकृत्य लभ्यते ज्ञानम् । उपनिषत्सु क्वचिल्लक्ष्यमाणाः दुरवगमांशाः स्पष्टा भवन्ति । अन्ते चेदम्, पुराणेतिहास-तन्त्र-शास्त्रादीनां वेदमूलत्वकीर्तनं वेदसारांशोपबृंहणमेव मुख्यं प्रयोजनं इति च उद्घोषयन्ति तत्तद्ग्रन्थ-प्रमाणवाक्यान्युपपन्नानीति निश्चयश्च लभ्यते । तस्मादसन्मूलानां बहुधा अनृतप्रायकल्पनाविद्धानां पाश्चात्यमतावलम्बिवेदवादानां निरासो न्याय्यः । वेदविचारे यावज्जीवं कृतविद्यानां सिद्धान्तस्य मूलतो विरोधादरविन्दपादीयो वेदगुप्तार्थवाद उपेक्षाक्षम इति वादः प्रत्युक्तः ॥

**द्वितीयः** सायणीय-सम्प्रदाय-वेदव्याख्या-प्रत्यवस्थानम् ।

सायणभाष्यादेवोद्गतो नूतनः सम्प्रदायः, येन ऋचः सर्वाश्च यज्ञकर्मैकपरा इति प्रत्ययः सर्वजनीनः सञ्जातः । यद्यपि यज्ञपरत्ववादी मन्त्राणां ब्राह्मणेभ्यः समुद्भूतः, तथाऽपि अध्यात्मरहस्यादिपरतया मन्त्राणां ग्रहणं आसीत्पुरेति विश्वासो विदितचरः प्राचां विदुषाम् । अत एव मन्त्राणां वेदपुरुषात्मतया पावनत्व वीर्यवत्व- पूजनीयत्वादिकमैतिह्यं पुरातन भारताभिजनेषु पुराणेतिहासेषु साक्षात्कृत परतत्त्वानां महामनसां निबन्धेषु निरूढमभवत् । प्राक् सायणीयवेदभाष्यात् न केनापि वेदानां सम्पूर्णं व्याख्यानं प्रणीतम् । प्रणीतमिति न श्रूयते, सर्वथा नोपलभ्यते । यत्र क्वचिन्निबद्धमपि भागशः उपलभ्यते, भागश एव निबद्धं वा स्यात् । चतसृणां सब्राह्मणारण्यकानां वेदसंहितानां व्याख्यानं ब्रह्माण्डप्रयासेनावभ्य कर्मैकपरतां वेदानां समर्थयामास व्याख्याता सायणाचार्यः । तस्मादस्य चतुर्वेदभाष्यं समस्तपण्डितमण्डलमावर्जयतीति नात्र चित्रम् । किं तु सायणीयः सम्प्रदाय एक एव चिरन्तनो वेदार्थविचारसम्प्रदाय इतीदं अपलपितं प्रतिपक्षधूर्वहेणेत्यलम् ॥

**तृतीयः** मीमांसकसिद्धान्तस्य प्रतिद्वन्द्वी भवत्यस्मत्पक्ष इति ।

वयमादिवेदसंहितासूक्त-तात्पर्यावगाहे प्रवृत्ताः, तस्मात् मन्त्रार्थविचारोऽत्र विषयोऽस्माकम्, न ब्राह्मणवाक्यार्थविचारः यत्र तु पूर्वतन्त्र विचक्षणाः प्रामाणिका भवन्तु नाम । ब्राह्मणानि मन्त्रार्थविवरणानि तत्र तत्र यज्ञोपयोगीनि भवन्तीति हेतोरेव सायणः प्रथमं ब्राह्मणं व्याख्याय ततः परं तदनुसारेण ऋचां व्याख्यानमारेभे ।

वेदवारिधिः प. रामानुजाचार्यः





# वेदे उपाख्यानानि, विज्ञानं च

वेदमन्त्रार्थः वेदेषु ब्राह्मणभागे एव बहुधा विवृतः, कर्मसु विनियोगविधिकाले तद्विषयकविवरणेन कर्मानुष्ठाने रुचिजनकश्च । **संवाद, प्रश्नोत्तर, उपाख्यान, तत्त्वोपदेशादि** बहुभिः प्रकारैः वेदः स्वयं ब्राह्मणादिभागेषु तन्मन्त्रार्थान् विवृणोति । अस्मत्संस्थातः प्रकाशिते वेदवैभवम् नाम्नि पुस्तके द्रष्टुं शक्यते ।) उदाहरणार्थम् एते विव्रियन्ते ।

1. **संवादः** - सꣳश्रवा ह ... (तै.सं. 1.7.2)
2. **प्रश्नोत्तरं** – ब्रह्मोद्यम् – तै.सं. 7.4.18); किं तद्विष्णोर्बलमाहुः (तै.आ. 1.8)
3. **उपाख्यानम्** – मन्थिनः सꣳस्रावे नाभानेदिष्ठकथा (चित्रम्)
4. **तत्त्वोपदेशः** – भार्गवी-वारुणी विद्या, श्रेयसे द्वादश मार्गाः (परमत्वेन), सद्विद्या, नाचिकेतविद्यादि बहुत्र ।

नावल्पाक्कं देवनाथाचार्यैः वेदविज्ञानम्, वासुदेवाचार्यैश्च वेदकथाः इति नाम्ना ग्रन्थाः प्रकाशिताः सन्ति । अग्निहोत्रं रामानुजताताचार्यैश्च वेदविषयकविमर्शाः बहवः तलस्पर्शितया कृताः बहूपयोगिनः वेदाध्यायिनाम् ।

वेदवारिधिः प. रामानुजाचार्यः





# अश्वमेधे होतृ-ब्रह्मणोर्मध्ये ब्रह्मोद्ये प्रश्नोत्तरे -

तै.सं. 7.4.18 - किं स्वित् आसीत् इत्यादि –

| | प्रश्नः | उत्तरम् |
|---|---|---|
| 1. | पूर्वचित्तिः | द्यौः |
| 2. | बृहद्वयः | अश्वः |
| 3. | पिशङ्गिला | रात्रिः |
| 4. | पिलिप्पिला | अविः |
| 5. | कः एकाकी चरति | सूर्यः |
| 6. | कः जायते पुनः | चन्द्रमाः |
| 7. | किं हिमस्य भेषजम् | अग्निः |
| 8. | किम् महत् आवपनम् | भूमिः |
| | पृच्छामि त्वा | |
| 9. | परम् अन्तं पृथिव्याः | वेदिम् आहुः |
| 10. | भुवनस्य नाभिम् | यज्ञम् आहुः |
| 11. | वृष्णो अश्वस्य रेतः | सोमः |
| 12. | वाचः परमं व्योम | ब्रह्मैव |

अस्य विनियोगः श्राद्धे निमन्त्रितैः भोक्तृभिः जप्यत्वमिति चास्ति ।

वेदवारिधिः प. रामानुजाचार्यः

# वेदे प्रश्नोत्तरे

(तै.आ. 1.8) एको यत् धारयत् देवः (विष्णुः)

| | प्रश्नः | उत्तरम् |
|---|---|---|
| 1. | किं तद्विष्णोः बलम् आहुः | वातात् |
| 2. | का दीप्तिः, किं परायणम् | अक्षरात् |
| 3. | एको यत् धारयत् देवः | त्रिपदाद्धारयद्देवः |
| | रेजती रोदसी उभे | यद्विष्णोरेकमुत्तमम् । |

एवमेव (तै.ब्रा. 2.8.9) जगतः उपादान, निमित्तकारणविषये प्रश्नोत्तरे

| | प्रश्नः | उत्तरम् |
|---|---|---|
| 1. | किं स्विद्वनं क उ स वृक्ष आसीत्<br>यतो द्यावापृथिवी निष्टतक्षुः | ब्रह्म वनं ब्रह्म स वृक्ष आसीत्<br>यतो द्यावापृथिवी निष्टतक्षुः |
| 2. | मनीषिणो मनसा पृच्छतेदु तत्<br>यदध्यतिष्ठत् भुवनानि धारयन् | मनीषिणो मनसा विब्रवीमि वः<br>ब्रह्माध्यतिष्ठत् भुवनानि धारयन् |

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com


# तत्त्वोपदेशः

प्रश्नोत्तररूपेण तत्त्वोपदेशः शास्त्रेषु प्रसिद्धः । संहिताब्राह्मणादिषु 'ब्रह्मवादिनो वदन्ति' इत्यादि बहुषु स्थलेषु प्लुतपूर्वकविचाराः प्रश्न, सम्भावितविकल्प, निर्धारणरूपाः अनुष्ठेयार्थविधायकाः दरीदृश्यन्ते । उपनिषत्सु (षट्) प्रश्नोपनिषदित्येव च विद्यते । पुरुषसूक्ते 'मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायत ।' इति, तैत्तिरीयोपनिषदि – 'अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती३ । आहो विद्वानमुं लोकं प्रेत्य । कश्चित्समश्नुता३उ' इति दृश्यते । सावित्रचयनप्रकरणे काठके 'ब्रह्मचारिणे प्रश्नान् प्रोच्य प्रजिघाय । प्लक्षं दैय्याम्पातिं पृच्छ । वेत्थ सावित्रा३न्न वेत्था३' इति प्रश्नावली श्रूयते । भृगुः पितरं वरुणं प्रति 'अधीहि भगवो ब्रह्मे'ति पप्रच्छ । आरुणिः सुपर्णेयः प्रजापतिं पितरं 'किं भगवन्तः परमं वदन्ती'ति पप्रच्छ । कठोपनिषदि 'त्वादृङ्नो भूयान्नचिकेतः प्रष्टा' इति नचिकेतसे यमः प्रश्नोत्तरं ब्रह्मविद्याम् उपदिदेश । बृहदारण्यके सर्वैः ब्रह्मवादिभिः बहुधा पृष्टः ब्रह्मिष्ठः याज्ञवल्क्यः उत्तराणि दत्तवान् । छान्दोग्ये श्वेतकेतवे स्वपुत्राय पिता उद्दालक आरुणिः प्रश्नोत्तरेण सद्विद्याम् उपदिदेश इत्यादि बहुत्र गम्भीराः आध्यात्मिकविचाराः तत्तद्विषयकप्रश्नोत्थानादेव आचार्यैः समाहिताः । 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥' (4.34) इति गीतायां, 'प्रश्नकालप्रतीक्षः' इति शिष्यलक्षणे न्यासविंशतौ आचार्याश्च । आदिकाव्ये 'नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्', इति, 'पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम् । मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च', इति श्रीमति विष्णुपुराणे च, एवं उपासदनम् अनुष्ठितं दृश्यते । श्रवण, मनन, निदिध्यासनैः हि ब्रह्मतत्त्वदर्शनं सिध्यति ॥ अतः ईदृशप्रकरणानां ज्ञानं श्रेयसे कल्पते ॥

वेदवारिधिः प. रामानुजाचार्यः

# वेदेषु विज्ञानम् (देवनाथाचार्याः)

जयन्तभट्टः न्यायमञ्जर्याम् - ईदृशश्चायम् अनन्यसामान्यविभवो महाभागो वेदनामा ग्रन्थराशिः, यदन्ये बाह्यागमवादिन एनमेव स्पर्धन्ते । ते हि स्वागमप्रामाण्यमभिवदन्तः वेदरीत्या अभिदधति । वेदे यथा तथा प्रवेष्टुमीहन्ते । वैदिकानर्थान् अन्तरान्तरा स्वागमेषु निबध्नन्ति । वेदस्पर्शपूतमिवात्मानं मन्यन्ते । तेषामप्यन्तर्हृदये ज्वलत्येव वेदप्रामाण्यम् । अत एवंविधाया महाजनप्रसिद्धेः आगमान्तरेष्वदर्शनान्न तेषामाप्तप्रणीतत्वम् । इति वेदस्य श्रैष्ठ्यं वक्ति ।

श्रीमद्भिः देवनाथताताचार्यैः वेदेषु विज्ञानं द्वादशप्रकरणैः द्राविडभाषायां लिखितम् । तत्रत्याः अंशाः –

| | |
|---|---|
| *1. பூமி எரிகின்றது* | भूमिः ज्वलति |
| *2. மரம் பயப்படுகிறது* | वृक्षः बिभेति |
| *3. ஒரு வருஷம் ஒரு நாள்* | संवत्सर एकः दिनमेकम् |
| *4. முப்பது சகோதரிகள்* | त्रिंशत् स्वसारः |
| *5. நீருள் நெருப்பு* | जले अग्निः |
| *6. உபவாஸம்* | उपवासः |
| *7. அக்னியா* | अग्निया |
| *8. கைக்குத்தலரிசி* | चरुः - ओदनम् |
| *9. ஐந்திரவ்யாகரணம்* | ऐन्द्रव्याकरणम् |
| *10. கணிதம்* | गणितम् |
| *11. கழுதை* | गर्दभः |
| *12. நக்ஷத்திரங்கள்* | नक्षत्राणि |

एषु सर्वेषु वेदादिबहुप्रमाणप्रदर्शनपुरस्सरं तैः वेदार्थावगतिविषये विस्तृमस्ति ।

वेदवारिधिः प. रामानुजाचार्यः

# नक्षत्राणां विषये वेदेषु विज्ञाने च

https://vishvasa.github.io/devaH/AryaH/hindukaH/classes/lokAntaram/images/naxatram/stellarium/

केषाञ्चन नक्षत्रनाम्नां निर्वचनञ्च वेदे (तै.ब्रा. 1.5) दृश्यते । यथा – तारका, नक्षत्रशब्दयोः, रोहिणी, अनूराधाः, ज्येष्ठा, मूलवर्हणी, अषाढाः, श्रोणा, अभिजित्, शतभिषक्, रेवती, अश्विनी, अपभरणी, इत्यादि अन्वर्थनामानीति प्रदर्श्यते ।

रूपणद्वारा नक्षत्रियः प्रजापतिश्च प्रस्तुतः - यो वै न॑क्ष॒त्रिय॑म्प्र॒जाप॑ति॒ँव्वेद॑ । उ॒भयो॑रेनल्लो॒ँकयोर्विदुः । हस्त॑ ए॒वास्य॒ हस्त॑: । चि॒त्रा शिर॑: । निष्ट्या॒ हृद॑यम् । ऊ॒रू विशा॑खे । प्र॒ति॒ष्ठाऽनू॑रा॒धाः । ए॒ष वै न॑क्ष॒त्रिय॑ः प्र॒जाप॑तिः । य ए॒वव्वेँद॑ । उ॒भयो॑रेनल्लो॒ँकयोर्विदुः । अ॒स्मिꣳश्चा॒मुष्मिꣳ॑श्च ।

वेदवारिधिः प. रामानुजाचार्यः





पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्चीकृता)

pivstrust.org ✉: pivstrust@gmail.com



# नक्षत्राणां विषये वेदेषु विज्ञाने च

| | Col.1 | Col.2 | Col.3 | Col.4 |
|---|---|---|---|---|
| अश्विनि कर्की रूपा | 1 | Cancer | 2 | 1 |
| भरणी कर्की शापा | 2 | Cancer | 5 | 1 |
| कृत्तिका सिंहे काया | 3 | Leo | 1 | 1 |
| रोहिणी सिंहे गुरु | 4 | Leo | 3 | 2 |
| मृगशिरः कन्या नेया | 5 | Virgo | 0 | 1 |
| आर्द्रा कन्या युता | 6 | Virgo | 1 | 6 |
| पुनर्वसु तुला नीला | 7 | Libra | 0 | 3 |
| पुष्य तुला राम | 8 | Libra | 2 | 5 |
| आश्लेषा तुला भोगी | 9 | Libra | 4 | 3 |
| मघा वृश्चिक कला | 10 | Scorpio | 1 | 3 |
| फल्गुनी वृश्चिक लता | 11 | Scorpio | 3 | 6 |
| उत्तिरं धनुः नाम | 12 | Sagittarius | 0 | 5 |
| हस्ता धनुः बला | 13 | Sagittarius | 3 | 3 |
| चित्रा धनुः शरैः | 14 | Sagittarius | 5 | 2 |

| | Col.1 | Col.2 | Col.3 | Col.4 |
|---|---|---|---|---|
| स्वाती मकरे काम | 15 | Capricornus | 1 | 5 |
| विशाखा मकरे वनम् | 16 | Capricornus | 4 | 0 |
| अनूराधा कुम्भे नाभिः | 17 | Aquarius | 0 | 4 |
| ज्येष्ठा कुम्भे कथा | 18 | Aquarius | 1 | 7 |
| मूलं कुम्भे गच्छ | 19 | Aquarius | 3 | 7 |
| पूर्वाषाढा मीने कपिः | 20 | Pisces | 1 | 1 |
| उत्तराषाढा मीने गथा | 21 | Pisces | 3 | 7 |
| श्रोणा मेषे रता | 22 | Aries | 2 | 6 |
| श्रविष्ठा वृषभे नाभिः | 23 | Taurus | 0 | 4 |
| शतभिषग् वृषभे राम | 24 | Taurus | 2 | 5 |
| प्रोष्ठवान् मिथुने परः | 25 | Gemini | 1 | 2 |
| अहिर्बुध्न्ये मिथुने भानू | 26 | Gemini | 4 | 0 |
| रेवती कर्की यज्ञः | 27 | Cancer | 1 | 5 |

Note: The four columns in the table indicate as follows: Col.1 gives the asterism number to be seen transiting the meridian. Col.2 gives the zodiacal sign which is rising at the time. Col.3 and Col.4 give the amount by which the sign has risen. Col.3 gives the whole number of ghaṭikās (each ghaṭikā = 24 minutes), and Col.4 gives the additional fraction of a ghaṭikā as so many eights.


वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com



# नक्षत्राणां विषये वेदेषु विज्ञाने च - कालज्ञानम्

SHRONA MESHA RATHA.
(JULY 24)




SHRONA → Asterism

MESHE → Zodiac Sign

RATA → *Ra + Ta =(2x24)+(6x3)=66 minutes (Ka-ta-pa-ya Sankhya)*

July 24 - The Sun is already five days inside Kataka.This gives 20 minutes for Sun to rise from kataka.
so,

20 minutes + 2hours through Mithuna + 2 hours through Vrishabha + 54 mins = 5hours and 14 minutes for sun to rise.
Hence, the time is 12 hours 42 minutes

| RESULT | Time is:12-42 AM |
|---|---|


वेदवारिधिः प. रामानुजाचार्यः

# कृत्तिका

कृत्तिका सिंहे काया

अ॒ग्निर्नः॑ पातु॒ कृत्ति॑काः । नख्ष॑त्रन्दे॒वमि॑न्द्रि॒यम् । इ॒दमा॑साँविचख्ष॒णम् । ह॒विरा॒सञ्जु॑होतन । यस्य॒ भान्ति॑ र॒श्मयो॒ यस्य॑ के॒तवः॑ । यस्ये॒मा विश्वा॒ भुव॑नानि॒ सर्वा᳚ । स कृत्ति॑काभिर॒भि सँ॒वसा॑नः । अ॒ग्निर्नो॑ दे॒वस्सु॑वि॒ते द॑धातु ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| अग्निः | अ॒न्ना॒दो दे॒वाना॑ꣳस्या॒मिति॑ | अष्टाकपालः पुरोडाशः |




कृत्तिका क्षुरसंस्थाना षट्तारा चाग्निदेवता ।
अग्निवेश्यश्च गोत्रेण विज्ञेया मृदुदारुणा ॥

वेदवारिधिः प. रामानुजाचार्यः





# रोहिणी

रोहिणी सिंहे गुरु

प्र॒जाप॑ते रोहि॒णी वे॑तु॒ पत्नी । वि॒श्वरू॑पा बृह॒ती चि॒त्रभा॑नुः । सा नो॑ य॒ज्ञस्य॑ सुवि॒ते द॑धातु । यथा॒ जीवे॑म श॒रद॒स्सवी॑राः । रो॒हि॒णी दे॒व्युद॑गात्पु॒रस्ता॑त् । विश्वा॑ रू॒पाणि॑ प्रति॒मोद॑माना । प्र॒जाप॑तिꣳ ह॒विषा॑ व॒र्धय॑न्ती । प्रि॒या दे॒वाना॒मुप॑यातु य॒ज्ञम् ।



| देवता | कामना | द्रव्यम् |
|---|---|---|
| प्रजापतिः | उप॒ मा व॑र्तेत । समे॑नया गच्छे॒येति॑ | चरुः |


रोहिणी शकटाकारा संस्थाना पञ्चतारका ।
नक्षत्रं स्थावरं विद्धि दैवतं च प्रजापतिः ॥
गोत्रेण गौतमी ज्ञेया ....

वेदवारिधिः प. रामानुजाचार्यः

# मृगशिरा

मृगशिरः कन्या नेया

सोमो राजा मृगशीर्षेण आगन्न् । शिवन्नक्षत्रम्प्रियमस्य धाम । आप्यायमानो बहुधा जनेषु । रेतꣳ प्रजाय्यँजमाने दधातु । यत्ते नक्षत्रम्मृगशीर्षमस्ति । प्रियꣳ राजन्प्रियतम-म्प्रियाणाम् । तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शञ्चतुष्पदे ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| सोमः | ओषधीनाꣳ राज्यमभिजयेयमिति | श्यामाकः चरुः पयसि |

त्रितारं सोमदैवत्यं मृदु मृगशिरो विदुः ।
कात्यायनीति गोत्रेण .... ॥


वेदवारिधिः प. रामानुजाचार्यः

# आर्द्रा

आर्द्रा कन्या युता

आ॒र्द्रया॑ रु॒द्रः॑ प्रथ॑मान एति । श्रेष्ठो॑ दे॒वाना॒म्पति॑रघ्नि॒यानाम् । नक्ष॑त्रमस्य ह॒विषा॑ विधेम । मा नः॑ प्र॒जाꣳ री॑रिष॒न्मोत वी॒रान् । हे॒ती रु॒द्रस्य॒ परि॑ णो वृणक्तु । आ॒र्द्रा नक्ष॑त्रञ्जुषताꣳ ह॒विर्नः॑ । प्र॒मु॒ञ्चमा॑नौ दु॒रि॒तानि॒ विश्वा । अपा॒घशꣳ॑सन्नुदता॒मरा॑तिम् ।

| देवता | कामना | द्रव्यम् |
| --- | --- | --- |
| रुद्रः | प॒शु॒मान्थ्स्या॒मिति॑ | प्रैय्यङ्गवः चरुः पयसि |




एकतारा भवेदार्द्रा रुद्रश्चैवात्र देवता ।

वेदवारिधिः प. रामानुजाचार्यः


pivstrust.org ✉: pivstrust@gmail.com

# पुनर्वसुः

पुनर्नो देव्यदितिस्स्पृणोतु । पुनर्वसू नः पुनरेताँय्यज्ञम् । पुनर्नो देवा अभियन्तु सर्वे । पुनःपुनर्वो हविषा यजामः । एवा न देव्यदितिरनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रियन्देवानामप्येतु पाथः ॥

| देवता | कामना | द्रव्यम् |
|---|---|---|
| पृथिवी | ओषधीभिर्वनस्पतिभिः प्रजायेयेति। | चरुः |

पुनर्वसु तुला नीला




पुनर्वसु द्वितारा च कुण्डल्याभ्यामिवालवत् ।
अदितिर्देवता चात्र

वेदवारिधिः प. रामानुजाचार्यः




श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः॒ सामा॑नि॒ यजूꣳ॑षि । सा हि श्रीर॒मृता॑ स॒ताम् ।

# पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)

pivstrust.org ✉: pivstrust@gmail.com

## पुष्यः

पुष्य तुला राम




बृह॒स्पतिः॑ प्र॒थ॒मञ्जाय॑मानः । ति॒ष्यं॑न्नख्ष॑त्रम॒भिसम्ब॑भूव । श्रेष्ठो॑ दे॒वाना॒म्पृत॑नासु जि॒ष्णुः । दिशोऽनु॒ सर्वा॒ अभ॑यन्नो अस्तु । ति॒ष्यः॑ पु॒रस्ता॑दु॒त म॑ध्य॒तो नः॑ । बृह॒स्पति॑र्नः॒ परि॑ पातु प॒श्चात् । बाधे॑तान्द्वेषो॒ अभ॑यङ्कृणुताम् । सु॒वीर्य॑स्य॒ पत॑यस्स्याम ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| बृहस्पतिः | ब्र॒ह्म॒व॒र्च॒सी स्या॒मिति॑ | नैवारः चरुः पयसि |

त्रितारामिषुसंस्थानाम् इष्टां क्षिप्रप्रदं शुभम् ।
पुरोहितमुपाध्यायं दैवज्ञं नागवं तथा ॥

वेदवारिधिः प. रामानुजाचार्यः






# आश्लेषा

इदꣳ सर्पेभ्यो हविरस्तु जुष्टम् । आश्रेषा येषामनुयन्ति चेतः । ये अन्तरिक्ष-म्पृथिवीङ्क्षियन्ति । ते नस्सर्पासो हवमागमिष्ठाः । ये रोचने सूर्यस्यापि सर्पाः । ये दिवन्देवीमनु सञ्चरन्ति । येषामाश्रेषा अनुयन्ति कामम् । तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| सर्पाः | भ्रातृव्यजयः | करम्भः आज्ये |

आश्लेषा तुला भोगी




आश्लेषा सार्पदैवत्या षट्तारा तु विसंस्थिता ।
आग्रायणीति गोत्रेण


वेदवारिधिः प. रामानुजाचार्यः

# मघा

उपहूताः पितरो ये मघासु । मनोजवसस्सुकृतस्सुकृत्याः । ते नो नक्षत्रे हवमागमिष्ठाः । स्वधाभिर्यज्ञम्प्रयतञ्जुषन्ताम् । ये अग्निदग्धा येऽनग्निदग्धाः । येऽमुल्लोकम्पितरः क्षियन्ति । याश्च विद्म याः उ च न प्रविद्म । मघासु यज्ञः सुकृतञ्जुषन्ताम् ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| पितरः | पितृलोक ऋध्नुयामेति | पुरोडाशः<br>षट्कपालः |

मघा वृश्चिक कला




चतुस्तारा मघा ज्ञेया कुट्टाकारं च यष्टिवत् ।
पितरो देवताश्चात्र

वेदवारिधिः प. रामानुजाचार्यः



श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः॒ सामा॑नि॒ यजू॑ꣳषि । सा हि श्रीर॒मृता॑ स॒ताम् ।


# पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)

pivstrust.org ✉: pivstrust@gmail.com

# पूर्वफल्गुनी

फल्गुनी वृश्चिक लता

ग॒वाम्पति॒ꣳ फल्गु॑नीनामसि॒ त्वम् । तद॑र्यमन्वरुण
मि॒त्र चारु॑ । तन्त्वा॑ व॒यꣳ सं॑नि॒तारꣳ॑ सनी॒नाम् ।
जी॒वा जीव॑न्त॒मु॒पसव्विँ॑शेम । येने॒मा विश्वा॒ भुव॑नानि॒
सञ्जि॑ता । यस्य॑ दे॒वा अ॑नुसँ॒य्यन्ति॒ चेत॑ः । अ॒र्य॒मा
राजा॒ऽजर॒स्तुवि॑ष्मान् । फल्गु॑नीनामृष॒भो रो॑रवीति ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| अर्यमा | प॒शु॒मान्थ्स्या॒मिति॑ | चरुः |

द्वितारा फाल्गुनी पूर्वा उग्रा च भगदेवता ।
पर्यङ्कसंस्थिता वापि गोत्रं विद्यात्पराशरम् ॥

वेदवारिधिः प. रामानुजाचार्यः


pivstrust.org ✉: pivstrust@gmail.com

# उत्तरफल्गुनी

उत्तिरं धनुः नाम

श्रेष्ठो देवानाम्भगवो भगासि । तत्त्वा विदुः
फल्गुनीस्तस्य वित्तात् । अस्मभ्यङ्क्षत्रमजरꣳ
सुवीर्यम् । गोमदश्ववदुपसन्नुदेह । भगो ह दाता
भग इत्प्रदाता । भगो देवीः फल्गुनीराविवेश ।
भगस्येत्तम्प्रसवङ्गमेम । यत्र देवैस्सधमादम्मदेम ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| भगः | भगी श्रेष्ठी देवानाꣳ स्यामिति | चरुः |





द्वितारोत्तरफाल्गुन्या स्थिराख्यार्यमदेवता ।
पर्यङ्कसंस्थिता चात्र गोत्रेण च पराशरः ॥

वेदवारिधिः प. रामानुजाचार्यः

# हस्तः

हस्ता धनुः बला

आया॑तु दे॒वस्स॑वि॒तोप॑यातु । हि॒र॒ण्ययें॑न सु॒वृता॒ रथे॑न । वह॒न्॒ हस्त॑ꣳ सु॒भगँ॑वि॒द्मनाप॑सम् । प्रय॒च्छन्॑त॒-म्पपु॑रि॒म्पु॒ण्य॒मच्छ॑ । हस्तः॒ प्रय॑च्छत्व॒मृत॒ँवसी॑यः । दक्षि॑णेन॒ प्रति॑गृभ्णीम एनत् । दा॒तार॑म॒द्य स॑वि॒ता वि॑देय । यो नो॒ हस्ता॑य प्रसु॒वाति॑ य॒ज्ञम् ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| सविता | श्रन्मे॑ दे॒वा दधी॑रन्न् । स॒वि॒ता स्या॒मिति॑ । | आशुव्रीहीणां पुरोडाशः द्वादशकपालः |

सावित्रं पञ्चतारा स्याद्धस्तं हस्ताङ्गसंस्थितम् ।
कुण्डिनी चैव गोत्रेण

वेदवारिधिः प. रामानुजाचार्यः



श्रीमते पराङ्कुशार्यमहादेशिकाय नमः । ऋचः सामा॑नि॒ यजू॒ꣳषि । सा हि श्रीर॒मृता॑ स॒ताम् ।

# पराङ्कुशाचार्य वैदिक अध्ययन संस्था (पञ्जीकृता)

pivstrust.org


✉: pivstrust@gmail.com

## चित्रा

त्वष्टा॒ नक्ष॑त्रम॒भ्ये॑ति चि॒त्राम् । सु॒भꣳसं॑सय्युँ॑व॒तिꣳ रोच॑मानाम् । नि॒वे॒शय॑न्न॒मृता॒न्मर्त्याꣳ॑श्च । रू॒पाणि॑ पि॒ꣳशन्भुव॑नानि॒ विश्वा᳚ । तन्न॒स्त्वष्टा॒ तदु॑ चि॒त्रा विच॑ष्टाम् । तन्नक्ष॑त्रम्भूरि॒दा अ॑स्तु॒ मह्य᳚म् । तन्न॑ᳶ प्र॒जां वी॒रव॑तीꣳ सनोतु । गोभि॑र्नो॒ अश्वै॒स्सम॑नक्तु य॒ज्ञम् ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| त्वष्टा | चि॒त्रम्प्र॒जाꣳवि॑न्दे॒येति॑ | पुरोडाशः अष्टाकपालः |

चित्रा धनुः शरैः




एकतारा भवेच्चित्रा त्वष्टा चैवात्र देवता ।
पत्यन्नासंस्थितं चापि अत्रिगोत्रं च गोत्रतः ॥

वेदवारिधिः प. रामानुजाचार्यः





# स्वाती

स्वाती मकरे काम

वा॒युर्नक्ष॑त्रम॒भ्ये॑ति॒ निष्ट्या᳚म् । ति॒ग्मशृ॑ङ्गो वृष॒भो रोरु॑वाणः । स॒मी॒र॒यन्भुव॑ना मात॒रिश्वा᳚ । अप॒ द्वेषा॑ᳲसि नुदता॒मरा॑तीः । तन्नो॑ वा॒युस्तदु॒ निष्ट्या॑ शृणोतु । तन्नक्ष॑त्रम्भूरि॒दा अ॑स्तु॒ मह्य᳚म् । तन्नो॑ दे॒वासो॒ अनु॑जानन्तु॒ काम᳚म् । यथा॒ तरे॑म दुरि॒तानि॒ विश्वा᳚ ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| वायुः | का॒म॒चार॑मे॒षु लो॒केष्व॒भिजं॑ये॒यमिति॑ | गृष्ट्यै दुग्धं पयः |




प्रत्येकं संस्थिता स्वाती वायव्यां चैकतारकी ।
माण्डव्येति च गोत्रेण

वेदवारिधिः प. रामानुजाचार्यः

# विशाखा

विशाखा मकरे वनम्

दू॒रम॒स्मच्छत्र॑वो यन्तु भी॒ताः । तदि॑न्द्रा॒ग्नी कृ॑णुता॒न्तद्विशा॑खे । तन्नो॑ दे॒वा अनु॑मदन्तु य॒ज्ञम् । प॒श्चात्पु॒रस्ता॒दभ॑यन्नो अस्तु । नक्ष॑त्राणा॒मधि॑पत्नी॒ विशा॑खे । श्रेष्ठा॑विन्द्रा॒ग्नी भुव॑नस्य गो॒पौ । विषू॑च॒श्शत्रू॒नप॒ बाध॑मानौ । अप॒ क्षुध॑न्नुदता॒मरा॑तिम् ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| इन्द्राग्नी | श्रैष्ठ्य॑न्दे॒वाना॑म॒भिज॑ये॒वेति॑ | पुरोडाशः एकादशकपालः |




विशाखेन्द्राग्निदैवत्यां मृदङ्गफणमेव च ।
कौशिकी च चतुस्तारा संथानं तोरणोपमम् ॥

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org     : pivstrust@gmail.com

# अनुराधा

अनूराधा कुम्भे नाभिः

ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रन्देवम्मित्रधेयन्नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतञ्जीवेम शरदस्सवीराः । चित्रन्नख्षत्रमुदगात्पुरस्तात् । अनूराधास इति यद्वदन्ति । तन्मित्र एति पथिभिर्देवयानैः । हिरण्ययैर्विततैरन्तरिख्षे ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| मित्रः | मित्रधेयमेषु लोकेष्वभिजयेयमिति | चरुः |

षद्वारा तु भवेन्मैत्रं रथानामिव संस्थितः ।
अपरद्वारकं श्रेष्ठम्

वेदवारिधिः प. रामानुजाचार्यः






# ज्येष्ठा

ज्येष्ठा कुम्भे कथा

इन्द्रो ज्येष्ठामनु नख्षत्रमेति । यस्मिन्वृत्रव्वृँत्रतूर्ये ततार । तस्मिन्वयममृतन्दुहानाः । ख्षुधन्तरेम दुरितिन्दुरिष्टिम् । पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे । इन्द्राय ज्येष्ठा मधुमद्दुहाना । उरुङ्कृणोतु यजमानाय लोकम् ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| इन्द्रः | ज्यैष्ठ्यन्देवानामभिजयेयमिति | महाव्रीहीणां पुरोडाशः एकादशकपालः |

त्रितारं चेन्द्रदैवत्यं ज्येष्ठा कुण्डलसंस्थिता ।

वेदवारिधिः प. रामानुजाचार्यः

# मूलम्

मूलं कुम्भे गच्छ




मूलम्प्रजांवीरवतींविंदेय । पराच्येतु निरृतिः पराचा । गोभिर्नक्षत्रम्पशुभिस्समंक्तम् । अहर्भूयाद्यजमानाय मह्यम् । अहर्नो अद्य सुविते दधातु । मूलन्नक्षंत्रमिति यद्वदन्ति । परांचीवांचा निरृतिन्नुदामि । शिवम्प्रजायै शिवमस्तु मह्यम् ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| प्रजापतिः | मूलम्प्रजांविन्देयेति | चरुः |

तारा द्वादश मूलोग्रा निर्ऋतिस्तत्र देवता ।
कौशिकी चैव गोत्रेण

वेदवारिधिः प. रामानुजाचार्यः






# पूर्वाषाढा

पूर्वाषाढा मीने कपिः

या दि॒व्या आप॒ः पय॑सा सम्बभू॒वुः । या अ॒न्तरि॑क्ष
उ॒त पार्थि॑वी॒र्याः । यासा॑मषा॒ढा अ॑नु॒यन्ति॒ काम॑म् ।
ता न॒ आप॒श्शꣳ स्यो॒ना भ॑वन्तु । याश्च॒ कूप्या॒ याश्च॑
ना॒द्यास्स॑मु॒द्रियाः॑ । याश्च॑ वैश॒न्तीरु॒त प्रा॑स॒चीर्याः॑ ।
यासा॑मषा॒ढा मधु॑ भ॒क्षय॑न्ति॒ । ता न॒ आप॒श्शꣳ
स्यो॒ना भ॑वन्तु ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| आपः | स॒मु॒द्रङ्का॑म॑म॒भिजं॑ये॒मेतिं | चरुः |

पूर्वाषाढं चतुस्तारामापश्चैवात्र देवता ।
दाक्षायणं च गोत्रेण सिंहपुच्छसदृक् तनुः ॥

वेदवारिधिः प. रामानुजाचार्यः

# उत्तराषाढा

उत्तराषाढा मीने गथा

तन्नो॒ विश्वे॒ उप॑शृण्वन्तु दे॒वाः । तद॑षा॒ढा अ॒भिसय्ँ॑न्तु य॒ज्ञम् । तन्नक्ष॑त्रम्प्रथताम्प॒शुभ्यः॑ । कृ॒षिर्वृ॒ष्टिर्यज॑मानाय कल्पताम् । शु॒भ्राः क॒न्याः॑ यु॒वत॑यस्सु॒पेश॑सः । क॒र्म॒कृत॑स्सु॒कृतो॑ वी॒र्या॑वतीः । विश्वा॑न्दे॒वान् ह॒विषा॑ व॒र्धय॑न्तीः । अ॒षा॒ढाः काम॒मुप॑ यान्तु य॒ज्ञम् ॥

| देवता | कामना | द्रव्यम् |
|---|---|---|
| विश्वेदेवाः | अ॒न॒प॒ज॒य्यञ्ज॑ये॒मेति॑ । | चरुः |




आषाढा ह्युत्तरा ज्ञेया विश्वेदेवा द्वितारका ।
गजापीडसमास्थाना गार्गी गोत्रं च स्थावरम् ॥

वेदवारिधिः प. रामानुजाचार्यः



# श्रवणम् (श्रोणा)

श्रोणा मेषे रता

शृ॒ण्वन्ति॑ श्रो॒णाम॒मृत॑स्य गो॒पाम् । पुण्या॑मस्या॒ उप॑शृणोमि॒ वाच॑म् । म॒हीन्दे॒वीं॒ विष्णु॑पत्नीमजू॒र्याम् । प्र॒तीची॑मेना॒ꣳ ह॒विषा॑ यजामः । त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे । म॒हीन्दिव॑म्पृथि॒वीम॒न्तरि॑क्षम् । तच्छ्रो॒णैति॒ श्रव॑ इ॒च्छमा॑ना । पुण्य॒ꣳ श्लोक॒ꣳ यज॑मानाय कृण्व॒ती ।

| देवता | कामना | द्रव्यम् |
| --- | --- | --- |
| विष्णुः | पुण्य॒ꣳ श्लोक॑ꣳ शृण्वीय । न मा॑ पापी॒ की॒र्तिरा॑गच्छे॒दिति॑ । | पुरोडाशः त्रिकपालः |




वैष्णवं श्रवणं विद्याद्दुर्तुलं त्रीणि तारकम् ।
अगस्त्यं चैव गोत्रेण

वेदवारिधिः प. रामानुजाचार्यः

# श्रवि(धनि)ष्ठा

श्रविष्ठा वृषभे नाभिः

अ॒ष्टौ दे॒वा वस॑वस्सो॒म्यास॑: । चत॑स्रो दे॒वीर॒जरा॒-श्श्रवि॑ष्ठाः । ते य॒ज्ञम्पान्तु रज॑सꣳ पु॒रस्ता॒त् । सँ॒व॒-थ्स॒रीण॑म॒मृतꣳ॑ स्व॒स्ति । य॒ज्ञन्न॑ꣳ पान्तु वस॑वꣳ पु॒रस्ता॒त् । द॒क्षि॒ण॒तो॑ऽभिय॑न्तु श्रवि॑ष्ठाः । पुण्य॒न्न-क्ष॑त्रम॒भिसंवि॑शाम । मा नो॒ अरा॑तिर॒घश॒ꣳसाऽग॑न्न् ।

| देवता | कामना | द्रव्यम् |
| --- | --- | --- |
| वसवः | अग्न्र॑न्दे॒वता॑ना॒म्प्री॑या॒मेति॑ | पुरोडाशः अष्टाकपालः |





धनिष्ठा वसुदैवत्या चतुस्तारास्तु सा स्मृता ।
मृदङ्गसंस्थिता चैव गोत्रं सङ्ख्यानकं स्मृतम् ॥

वेदवारिधिः प. रामानुजाचार्यः

# शतभिषा

शतभिषग् वृषभे राम




ख्ष॒त्रस्य॒ राजा॒ वरु॑णोऽधिरा॒जः । नख्ष॑त्राणाꣳ श॒त-
भि॑षग्वसि॑ष्ठः । तौ दे॒वेभ्य॑ᳵ कृणुतो दी॒र्घमायु॑ः । श॒त
ꣳ स॒हस्रा॑ भेष॒जानि॑ धत्तः । य॒ज्ञन्नो॒ राजा॒ वरु॑ण॒
उप॑यातु । तन्नो॒ विश्वे॑ अ॒भिसय्यँ॑न्तु दे॒वाः । तन्नो॒
नख्ष॑त्रꣳ श॒तभि॑षग्जुषा॒णम् । दी॒र्घमायु॒ᳶ प्रति॑रद्भेष॒-
जानि॑ ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| इन्द्रः | दृ॒ढोऽशि॑थिलस्स्या॒मिति॑ | कृष्णव्रीहीनां पुरोडाशः दशकपालः |

उदग्द्वारं शतभिषक् वारुणं चात्र दैवतम् ।
कात्यायनी च गोत्रेण ताराश्चैव शतं भवेत् ॥

वेदवारिधिः प. रामानुजाचार्यः

# पूर्वप्रोष्ठपदा (पूर्वाभाद्रा)

प्रोष्ठवान् मिथुने परः

अ॒ज एक॑पा॒दुद॑गात्पु॒रस्ता॑त् । विश्वा॑ भू॒तानि॑ प्रति॒मो-
द॑मानः । तस्य॑ दे॒वाः प्र॑स॒वय्यँ॑न्ति॒ सर्वे॑ । प्रो॒ष्ठ॒प॒दा-
सो॑ अ॒मृत॑स्य गो॒पाः । वि॒भ्राज॑मानस्समिधा॒न उ॒ग्रः ।
आऽन्तरि॑क्षमरुहद॒ग॒न्द्याम् । तꣳ सूर्य॑न्दे॒वम॒जमेक॑-
पादम् । प्रो॒ष्॒ठ॒प॒दासो॒ अनु॑यन्ति॒ सर्वे॑ ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| अजः एकपात् | ते॒ज॒स्वी ब्रह्मवर्च॒सी स्या॒मिति॑ | चरुः |



अजैकपाद्दैवतारं च पूर्वं प्रोष्ठपदं स्मृतम् ।
गोत्रेण हारितश्चैव

वेदवारिधिः प. रामानुजाचार्यः

# उत्तरप्रोष्ठपदा (उत्तराभाद्रा)

अहिर्बुध्ने मिथुने भानू



अहिर्बुध्नियः प्रथमान एति । श्रेष्ठो देवानामुत मानुषाणाम् । तम्ब्राह्मणास्सोमपास्सोम्यासः । प्रोष्ठपदासो अभिरक्षन्ति सर्वे । चत्वार एकमभिकर्म देवाः । प्रोष्ठपदास इति यान् वदन्ति । ते बुध्नियम्परिषद्यꣳ स्तुवन्तः । अहिꣳ रक्षन्ति नमसोपसद्य ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| अहिर्बुध्न्यः | इमाम्प्रतिष्ठाविन्देयेति | पुरोडाशः भूमिकपालः |


अहिर्बुध्न्यं द्वितारं च उत्तरप्रोष्ठपाद्विदुः ।
आरम्भाणि च कुर्वीत गोत्रेण विषमाणि च ॥

वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org : pivstrust@gmail.com

# रेवती

रेवती कर्की यज्ञः




रेवती पौष्णदेवत्या द्वात्रिंशत्तारका विदुः ।

पूषा रेवत्यन्वेति पन्थाम् । पुष्टिपती पशुपा वाजब-
स्त्यौ । इमानि हव्या प्रयता जुषाणा । सुगैर्नो
यानैरुपयाताय्यँज्ञम् । क्षुद्रान्पशून्रक्षतु रेवती नः ।
गावो नो अश्वाꣳ अन्वेतु पूषा । अन्नꣳरक्षन्तौ बहु-
धा विरूपम् । वाजꣳ सनुताँय्यजमानाय यज्ञम् ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| पूषा | पशुमान्थ्स्यामिति | चरुः |

वेदवारिधिः प. रामानुजाचार्यः





# अश्विनी

तद॒श्विना॑वश्व॒युजोप॑याताम् । शुभ॒ङ्गमि॑ष्ठौ सु॒यमे॑भि॒-
रश्वैः । स्वन्नक्ष॑त्रꣳ ह॒विषा॒ यज॑न्तौ । मध्वा॒ सम्पृ॑-
क्तौ॒ यजु॑षा॒ सम॑क्तौ । यौ दे॒वाना॑म्भि॒षजौ॑ हव्यवा॒हौ
। विश्व॑स्य दू॒ताव॒मृत॑स्य गो॒पौ । तौ नक्ष॑त्रञ्जुजु-
षा॒णोप॑याताम् । नमो॒ऽश्विभ्याङ्कृणुमोऽश्व॒युग्भ्याम् ।

| देवता | कामना | द्रव्यम् |
|---|---|---|
| अश्विनौ | श्रो॒त्र॒स्विना॒वब॑धिरौ स्या॒वेति॑ । | पुरोडाशः द्विकपालः |

अश्विनि कर्की रूपा




अश्विनी दैवतं क्षिप्रम् आश्विनद्वित्रितारकम् ।


वेदवारिधिः प. रामानुजाचार्यः

pivstrust.org
: pivstrust@gmail.com

# अपभरणी

भरणी कर्की शापा

अप॑ पा॒प्मान॒म्भर॑णीर्भरन्तु । तद्य॒मो राजा॒ भग॑वा॒न्विच॑ष्टाम् । लो॒कस्य॒ राजा॑ मह॒तो म॒हान् हि । सु॒गन्नः॒ पन्था॒मभ॑यङ्कृणोतु । यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा । यस्मि॑न्नेनम॒भ्यषि॑ञ्चन्त दे॒वाः । तद॑स्य चि॒त्रꣳ ह॒विषा॑ यजाम । अप॑ पा॒प्मान॒म्भर॑णीर्भरन्तु ।




| देवता | कामना | द्रव्यम् |
|---|---|---|
| यमः | पि॒तॄ॒णाꣳ रा॒ज्यम॒भिज॑येय॒मिति॑ | चरुः |

याम्यं त्रितारं चोग्रं च भरणी यमदैवतम् ।
मौद्गल्याय च गोत्रेण

वेदवारिधिः प. रामानुजाचार्यः





pivstrust.org ✉: pivstrust@gmail.com

# वेदाः विज्ञानं च

वेदेषु विज्ञानं न अन्वेष्टव्यम्, यतः वेदा एव विज्ञानम् । बहुप्रकारकविज्ञानम् अद्यत्वे प्रथते प्रत्येकं भिन्नमिव च प्रसार्यते । आर्षविज्ञानाख्यवेदे, चतुर्दशविद्यास्थानरूपे, सर्वे प्राकृताः चैतन्ययुक्ताश्च अंशाः मिलित्वैव सन्ति । तेषु प्रकृतेः चतुर्विंशतितत्त्वात्मना विभागः, पञ्चविंशः जीवाख्यचेतनः, तथा षड्विंशः परमचेतनः परमात्मा च पूर्वयोः नियन्ता इत्यस्मात् आधिभौतिकादिविज्ञानं प्रकृत्याख्याचित्स्तरे, आधिदैवादिविज्ञानं जीवाख्यचेतनस्तरे तथा आध्यात्मिकांशः परमात्मरूपसर्वेश्वरस्तरे च प्रतिपाद्यते । संहृत्य विशिष्टम् एकं तत्त्वमिति निर्णयः ।

तत्र प्रकृतेः चतुर्विंशतितत्त्वेषु पञ्चभूतानां प्राधान्यम् इन्द्रियादिग्राह्यत्वात्, चेतनानामपि शरीरे अवस्थानोपयोगित्वात् च वेदेषु आकाश, वायु, तेजोऽबन्न(पृथिवी)रूप पञ्चप्रकारयुक्तत्वं प्रति विस्तृतं प्रतिपादनं दृश्यते । आकाशशरीरं ब्रह्म, नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि, इत्याभ्यां आद्यभूतद्वयविषये ब्रह्मत्वं श्रूयते । तेजोऽबन्नानां विषये वयं विस्तरेण पश्यामः, यतः तत्र वैज्ञानिकपद्धतिश्च तुलनात्मकदृष्ट्या अध्येतुं शक्यते ।

तेजसः अपां च शुचित्वं पावकत्वं चेत्यंशद्वयं 'शुचिः पावक ईड्यः', 'हिरण्यवर्णाः शुचयः पावकाः' इत्यादौ श्रुतिषु सश्रद्धं बोध्यते । वैदिकानुष्ठानविधुरे विज्ञाने एषोऽम्शः न गण्यते । शुद्धं तेजस्तत्त्वं, शुद्धाश्चापः कथं नित्यजीवने उज्जीवनोपकारका इति ज्ञाते परं, तस्य वैशिष्ट्यं ज्ञेयमुपयोक्तव्यं चेति अग्रे पश्यामः ।

प्रथमतया भोजनाय कृष्टपच्यानां पाकः तेजसा निष्पाद्यते । तत्र तेजोगुणविचारः उपयोगी । एवं स्नान, जलपानाद्यर्थमपि अपां गुणविशेषज्ञानं बहुधा अपेक्षितम्, यतः 'यो यच्छ्रद्धः स एव सः' इति, 'श्रद्धा वा आपः', 'यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्दधते' इत्यादिभ्यः ज्ञायते ॥

वेदवारिधिः प. रामानुजाचार्यः

# अप्तत्त्वविषये

तेजोविषये त्वमग्ने द्युभिरिति मन्त्रः बहुस्रोतोभ्यः अग्नेः जन्म वक्ति । आधुनिकविज्ञानेऽपि ऊर्जाविषये विविधप्रकाराः उपयुज्यन्ते, परं शुचित्व, पावकत्वविषये चिन्ता न दृश्यते । अनुज्ञापरिहारौ देहसम्बन्धात् ज्योतिरादिवत् इति ब्रह्मसूत्रे कश्चन तात्त्विकांशः अवधेयः उल्लिखितः ।

एवम् अपां विषये च बहुधा गुणविशेषाः प्रतिपाद्यन्ते, श्रद्धात्वं च । (तै.ब्रा. 2.7.7) अ॒पाय्यौँ॒ द्रवं॑णे॒ रसः॑ । तम॒हम॒स्मा आ॑मुष्याय॒णाय॑ । तेज॑से ब्रह्मवर्च॒साय॑ गृह्णामि । अ॒पाय्यँ॒ ऊ॒र्मौ रसः॑ । तम॒हम॒स्मा आ॑मुष्याय॒णाय॑ । ओज॑से वी॒र्या॑य गृह्णामि । अ॒पाय्यौँ॒ म॑ध्य॒तो रसः॑ । तम॒हम॒स्मा आ॑मुष्याय॒णाय॑ । पुष्ट्यै॒ प्र॒जन॑नाय गृह्णामि । अ॒पाय्यौँ॒ य॒ज्ञियो॒ रसः॑ । तम॒हम॒स्मा आ॑मुष्याय॒णाय॑ । आयु॑षे दीर्घायु॒त्वाय॑ गृह्णामि ॥22॥

कारीरीष्टिप्रकरणे मान्दा वाशाः शुन्ध्यूरजिराः । ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः । मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह माऽवत । (तै.सं. 2.4.7), मान्दा॑सु ते शुक्र शु॒क्रमा धू॑नोमि भ॒न्दना॑सु॒ कोत॑नासु॒ नूत॑नासु॒ रेशी॑षु॒ मेषी॑षु॒ वाशी॑षु॒ विश्व॒भृथ्सु॒ माध्वी॑षु॒ ककु॒हासु॒ शक्व॑रीषु शु॒क्रासु॑ ते शुक्र शु॒क्रमा धू॑नोमि शु॒क्रन्ते॑ शु॒क्रेण॑ गृह्णा॒म्यह्नो॑ रू॒पेण॒ सूर्य॑स्य र॒श्मिभि॑ः । आऽस्मि॑न्नु॒ग्रा अ॑चुच्यवु॒र्दिवो॒ धारा॑ असश्चत । (तै.सं. 3.3.3,4)

अब्लिङ्गाः, वारुणीः, हिरण्यवर्णाश्च अनुवाकाः विविधं विनियुक्ताः शान्ति, शोधनादिकर्मसु ।

एवं वृष्टिचक्रादिविषये च वेदोक्तमधुनापि उपयुक्तम् अङ्गीकार्यं चास्ति ।

वेदवारिधिः प. रामानुजाचार्यः





# अपां स्थानभेदेन गुणभेदाः

7.4.13 कूप्याभ्य॒स्स्वाहा॒ कूल्याभ्य॒स्स्वाहा॑ विक॒र्याभ्य॒स्स्वाहा॑ऽव॒ट्याभ्य॒स्स्वाहा॒ खन्याभ्य॒स्स्वाहा॒ ह्रद्याभ्य॒स्स्वाहा॒ सूद्याभ्य॒स्स्वाहा॑ स॒र॒स्याभ्य॒स्स्वाहा॑ वैश॒न्तीभ्य॒स्स्वाहा॑ पल्व॒ल्याभ्य॒स्स्वाहा॒ वर्ष्याभ्य॒स्स्वाहा॑ऽव॒र्ष्याभ्य॒स्स्वाहा ह्रा॒दुनीभ्य॒स्स्वाहा॒ पृष्वाभ्य॒स्स्वाहा॒ स्यन्द॑मानाभ्य॒स्स्वाहा स्थाव॒राभ्य॒स्स्वाहा॑ नाद॒याभ्य॒स्स्वाहा॑ सैन्ध॒वीभ्य॒स्स्वाहा॑ समु॒द्रियाभ्य॒स्स्वाहा॒ सर्वाभ्य॒स्स्वाहा ॥ [39]

7.4.14 अ॒द्भ्यस्स्वाहा॒ वह॑न्तीभ्य॒स्स्वाहा॑ परि॒वह॑न्तीभ्य॒स्स्वाहा॑ सम॒न्तँव्वह॑न्तीभ्य॒स्स्वाहा॒ शीघ्रँ॒व्वह॑न्तीभ्य॒स्स्वाहा॒ शीभँ॒व्वह॑न्तीभ्य॒स्स्वाहो॒ग्रँव्वह॑न्तीभ्य॒स्स्वाहा॑ भी॒मँव्वह॑न्तीभ्य॒स्स्वाहाऽम्भोभ्य॒स्स्वाहा॒ नभोभ्य॒स्स्वाहा॒ महोभ्य॒स्स्वाहा॒ सर्व॑स्मै॒ स्वाहा ॥ [40]

# Vedic scheme of things related to Climate

- Theory of Causation – भूतानां कार्यकारण-विज्ञानेच्छा
- पञ्चभूतानि - पृथिव्यप्तेजोवाय्वाकाशाः (Five elements)
- पृथिवी, भूभ्रमणं, भूकम्पः
- आपः – षड्रसोत्पत्तिः, वृष्टिः, सप्त पर्जन्याः, मेघोत्पत्तेः कालावधिः, वृष्टिविसर्जनप्रकारः, वृष्टितत्त्वद्रष्टारः
- वृक्षादिशरीराणि
- तेजः, तेजःप्रभेदः, गुणविशेषेण तेजोविभागः, चन्द्रः, नक्षत्राणि, छाया, इन्द्रधनुः, पाकः, सप्तधातवः, पाकतत्त्वं, पाकविचारः, दीपावरकाः, पाकविधिप्रयोगः